# FRAGMENTS OF THE KĀTHAKA ŚRAUTASŪTRA.

# काठकश्रौतसूत्रसङ्कलनम्

## (प्रथमो लेखः)

बहुभिर्विद्वद्भिः कृतेऽपि प्रयत्ने नाद्यावधि प्राप्तं काठकसूत्रम् । सर्वेषु श्रौतसूत्रेष्विदं बृहत्तममासीदिति कठशाखिनां सुविज्ञातम् । तथा च काठकगृह्यव्याख्यायामादावेव देवपालः—एकोनचत्वारिंशताध्यायैर्वैतानिकानि कर्माणि प्रतिपादितानीति ॥

लुप्तेऽपि मूलग्रन्थेऽस्यासंख्यातान्युद्धरणानि विविधग्रन्थेष्वितस्ततो विकीर्णान्युपलभ्यन्ते । अस्यां लेखपरम्परायां तान्येव संगृहीतुमस्माकमारम्भः । प्रथमं तावद् वेबरमहोदयप्रकाशितायां कात्यायनश्रौतव्याख्यायां तत्पद्धतौ च याज्ञिकदेवोदाहृतानि सूत्राणि लिख्यन्ते । अत्रापि चैकादशाध्यायपर्यन्तमेव । अन्येऽध्याया अप्रकाशिताः । प्राचीनकोशेषु तान्यप्यवलोक्य द्वितीयस्मिन् लेखे प्रकाशयिष्यामः ॥

याज्ञिकदेवसमये कठसूत्रं सुप्राप्यमासीदिति सुनिश्चितम् । असौ हि क्वचित् क्वचित् सूत्रमनुदाहृत्य स्वपाठकेभ्यो ग्रन्थालोकनमुपदिशति । तद्यथा—अस्य [वेदस्य] निर्माणप्रकारः कठमैत्रसूत्रादिषु विलोकनीयः । (१ । ३ । २३)

१. काठके—ग्रन्थिं कृत्वा पुरस्तात् प्रत्यञ्चमपकर्षतीति । पृ० ५३

२. काठके—अष्टादशदारुं शुष्कं समानवृक्षस्य सन्नह्यति विंशतिमिष्टौ पशुबन्धे चेति । पृ० ५३

३. लौगाक्षिः—वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायम्य शुल्वात् प्रादेशे छित्वाग्राणीध्मे निधायोत्करे मूलानि ततो वेदिकरणमिति । पृ० ५५

४. अत एव मैत्रकठापस्तम्बसूत्रेषु वैकङ्कती ध्रुवेति पठ्यते । पृ० ५९

५. लोकाच्छेषस्य प्रतिपत्तिरिति कठसूत्रात् । पृ० ५९

६. मण्डनः—रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः ।
कुर्वीत चमसांस्तेषामभावेऽन्यद्द्रुमोद्भवान् ।...

अग्निहोत्रहवण्यत्र ग्राह्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या ह्यभावेऽन्यवृक्षजा । इति । पृ० ६१

७. काठके—अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्यतया निर्वपणमितरासां, बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद् वैकङ्कती ध्रुवा शमीभूर्जमय्यो वा त्वक्तोबिला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्चमसा रौहीतका वा सर्वाणि वा पर्णमयानि स्फ्यस्रुवशम्यं खादिरं प्राशित्रहरणं च यद्वायज्ञियानां पात्रीडाचमसम । लोकाच्छेषस्य प्रतिपत्तिरिति । पृ० ६१

८. तदुक्तं मंडनमिश्रैः—छिन्नं लूनं च पिष्टं च साम्नाय्यं मृन्मयं तथा ।
लोकसिद्धं गृहीतं चेत् मन्त्रा जाप्याः कठाशयात् । पृ० १६५

९. काठके—पूर्णे पौर्णमासीमुपवसेद्, अदर्शनेऽमावास्यामिति । १६९

१०. काठके—तस्मात् तृणमादायोभयतः प्रतिछिद्य दक्षिणा प्रत्यक्तृणं निरस्यतीति । पृ० १७७

११ साङ्गारेण भस्मनेति काठके । पृ० २०५

१२. काठके—वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्ट्योपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायस्य शुल्वात् प्रादेशे छित्वाग्राणीध्मे निधायोत्करे मूलानीति । पृ० २०६

१३. काठके च—पुरस्तात् प्रस्तरादनन्तर्गर्भौ विधृती आदाय वेद्यामुदञ्चौ निधायेति । पृ० २२८

१४. काठके च—लेपाद् द्विरुपस्तारः सकृत् पुरोडाशावदानं लेपाद् द्विरभिघारणमिति । पृ० २६२

१५. काठके—पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् । पिता प्रेतः स्यात् पितामहो जीवेत् पित्रे पिण्डं निधाय पितामहात् पराभ्यां द्वाभ्यां दद्यादिति । पृ० २९४

१६. कठसूत्रे—पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति । पृ० ३५०

१७. काठके च—आधानं चेत् पौर्णमास्यां पूर्वां तनूर्देवताभ्य उपवसेदुत्तरा-मन्वारम्भणीयायै पर्वणे चेति । पृ० ३५५

१८. लौगाक्षिः—पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति । पृ० ३५५

इदं वचनं षोडशेन समानम् ।

१९. पुत्रस्य नाम गृह्णाति पुत्रयोः पुत्राणां वा प्रियतमस्येति लौगाक्षिरिति [काठके] । पृ० ३९३

२०. तत्र प्रकारद्वयम्—होमाद्यर्थमुद्धृतान् सम्भाव्य प्रवत्स्यदुपस्थानेनैवोप-स्थानमिति कठसूत्रे । पृ० ३९७

२१. कठसूत्रे विशेषः—प्रवसत उपस्थानं याजमानं चेत्येके नेति लौगाक्षिः । प्रवसन् यदा हुतं मन्येताथ भुञ्जीत । पर्वण्युपोष्य यदा संस्थितं मन्येताथ भुञ्जीतेति । तथा—अनुपस्थाय प्रवसन् प्रवत्स्यदुपस्थानेन प्रतिदिशमुपतिष्ठेतेति । तथा—यदाऽग्निहोत्रे संस्थिते वा तन्त्र आगच्छेदा-गतोपस्थानमेवास्य तदहः स्यान्न नित्यमग्न्युपस्थानं न याजमानमित्येके । विसंस्थिते वा तन्त्र आगच्छेदागतोपस्थानेनोपस्थाय यदतीतं याजमानं तज्जपेन्नातीतं जपेदिति लौगाक्षिरिति । पृ० ३९९

२२. कठसूत्रेऽप्येवमेवोक्तमस्ति—श्वो भूते तुल्यमा निर्वपणादिति । पृ० ४२६

२३. तथा काठके—अग्नये वैश्वानराय द्वादशकपालमिति । पृ० ४२६

२४. काठके च—ब्रह्मचारिव्रतो भवत्या समापनादधःशायी मांसं स्त्रियश्च वर्जयेत् । काममृतौ जायामुपेयाद् इति लामकायनिनां ब्राह्मणमिति । पृ० ४३८

२५. अत्र कठसूत्रम्—आमयवपिष्टानां करम्भपात्राणि यावन्तो यजमा-नस्य पुत्रपौत्रा यजमानः पत्नी च प्रतिपिष्टे एकमधिकं शृङ्गिणं मेषमशृङ्गीं मेषीं शुक्लोर्णाभिरावेष्टयेति । पृ० ४४२

२६. एतेषां कठादीनां वारुणप्रघासिकहविर्ग्रहणकाल ऐन्द्राग्ननिर्वापा-नन्तरं करम्भपात्रादीनां निर्वपणं विहितमस्ति । पृ० ४४३

२७. काठके च—उत्तरतश्चात्वालं बहिर्वेदि सम्प्रत्युत्तरवेदेस्त्रिप्रक्रमे ऽपरिमिते वेति, जानुदघ्नं खात्वेति च । पृ० ४४८

२८. काठके—परिमण्डलां वेति। पृ० ४५१

२९. काठके च—श्वो भूते ऽग्नी प्रणयते यथा पशुबन्ध इति। पृ० ४५९

३०. तथा च काठके—श्रीन्परिधीन्पैतुदारवान् प्रादेशमात्रांस्तैरुत्त[रवेदि]-नाभिं परिदध्यादिति। पृ० ४६०

३१. तथा च काठके—अध्वर्युरेव सम्प्रैषान्मारुतीवर्जमिति। पृ० ४६२

३२. काठके—यावन्तो ऽवेष्ट्येति। पृ० ४६८
अत्र याज्ञिकदेवेन कठसूत्रस्याद्यन्तावेव दत्तौ। इदं पंचविंशेन समानम्।

३३. काठके च—प्रतिप्रस्थाता पत्नीमाह कति ते कान्ता इति। सत्यं वदेत् निर्दिष्टान् तान् वरुणो गृह्णात्विति [ब्रूयाद् इति]। पृ० ४७३

३४. काठके च—तानि शूर्पेण। शूर्पहस्ता पत्न्यादित्यमुपतिष्ठते नमस्त आतानेत्यन्तर्वेदि गच्छति। अपरेण विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा पूर्वेण दक्षिणमग्निं प्रत्यञ्चौ तिष्ठन्तौ पत्नीयजमानौ शूर्पमन्वारभ्य जपं प्रधास्यान् इति द्वे यद् ग्राम इति हुत्वाक्रन्निति जपित्वा यथार्थं प्रव्रजत इति। पृ० ४७४

३५. तथापस्तम्बः—एधोऽसीति समिध आधायाहवनीयमुपतिष्ठन्त इति। एवमेव मानवकठसूत्रयोरपि। अनपेक्षमाणा आयन्ति समिधः समिन्द्ध एधोऽसीत्यग्नौ समिधमादधातीति काठके। पृ० ४७९

३६. काठके च—वारुण्या निष्काषेणावभृथं यन्त्युदञ्चं प्राञ्चमुरुं हि राजेति द्वाभ्यां स्थावरमुदकं गत्वा तस्य पश्चादुपविश्याग्नेरनी-कमित्यप्स्वाघारमाघारयति तृणे दारुणि वा शेषेण चतुरोऽपबर्हिषः प्रयाजान् यजत्याज्यभागाविष्ट्वा निष्काषस्यावदाय वरुणं यन्त्रत्यग्नीवरुणौ स्विष्टकृद्धर्मेणोत्तरावनुयाजाविष्ट्वा देवौ यजेति प्रथमस्य सम्प्रैष आयन्ति यथा पशुबन्ध इति। पृ० ४७९

३७. आपस्तम्बकठमानवसूत्रेषु चायमेव पक्ष उक्तोऽस्ति। पृ० ४८६

३८. सायमिति काठके। पृ० ४९१

३९. एवमपि च मैत्रकठतैत्तिरिसूत्रेष्वप्युक्तमस्ति। पृ० ५०२

४०. काठके—सपवित्रे निवान्या[या] गोर्दुग्धं सक्तूश्चेषीकया प्रस-व्यमन्वारभ्योपमन्थतीति। पृ० ५१०

४१. काठके च—उपमूललूनं बर्हिरिति पूर्वेण दक्षिणमग्निमेकैकं पात्रं प्रयुनक्त्यपरेण ब्रह्मयजमानाविति। पृ० ५११

४२. काठके च—अनूच्यमानायां सामिधेन्यां त्रिरिध्ममादधातीति। पृ० ५१३

४३. यावन्तो यजमानस्य पुत्रपौत्रा इति काठके। पृ० ५३०

४४. काठके—अ[थ] सद्योऽग्निष्टोमाय दीक्षते पशुना वेति। पृ० ५४०

४५. काठके—[तदहः] शुनासीर्यं चतुर्थ्यां मासि चतुर्षु वा मासेषु शुनासीर्येण यजेतेति। पृ० ५४४

४६. कठानां पञ्चाहिकानि पठ्यन्ते। पृ० ५५३

४७. कठानाञ्च प्रतिपद आरभ्य क्रियन्त इति पठ्यते। पृ० ५५४

४८. काठके—देवस्त्वेत्युक्त्वेति। पृ० ५६८

४९. काठके—प्रागग्रे रथमात्रीं वेदिं प्राक् परिग्रहात् कृत्वा तस्याः पूर्वार्धाद् द्वात्रिंशदङ्गुलामुत्तरवेदिं चतुःस्रक्तिं प्रत्यग्यूपदेशात् पदमात्रे भूयसि वा, अपरिमिता वेदिर्यदा स्याद् दशापदोत्तरवेदिः सम्भवेत् तां वेदिं कुर्यादिति लौगाक्षिरिति। पृ० ५७३

५०. सम्भारानुत्तरनाभौ न्युप्यापि वैतदन्तं पूर्वेद्युः स्यादिति काठके। पृ० ५७३

५१. तथा च काठके—त्रिरनूक्त उत्तरेण वेद्यन्तेन गत्वा पूर्वेणोत्तरवेदिं प्रत्यङ् तिष्ठन्नित्यादि। पृ० ५७४

५२. काठके—आहरन्त्याज्यं पात्राण्यरणी प्रथमपरापतितं स्वर्वधिमन्थनौ च शल्कौ कार्ष्मर्यमय्यौ वपाश्रपण्यौ रशने त्रिगुणां त्रिव्यामां द्विगुणां द्विव्यामां प्लाक्षीमध्यवदानीं स्वधितिं कुम्भीं दण्डं शूलं यूपं प्रक्षालितं पशुं स्नातं पन्नदमव्यङ्गं येन चार्थो विहारं परिस्तीर्य पात्राणि प्रयुनक्तीति। पृ० ५७५

५३. अत्र काठके विशेषः—दधि च निर्वपति यथाज्यं द्वे उपभृन्मन्त्रे चतुर्गृहीतान्याज्यानि द्वितीयस्यामुपभृति तेज इत्युपस्तीर्य ज्योतिरसीति दध्यासिच्योत्तमाभ्यामभिघार्य शेषे घृतमासिच्य तस्य पञ्चभिघारणं वनस्पतिं च यजतीति। पृ० ५७६

५४. कठसूत्रे—प्रादेशमात्रं सम्प्रवेष्ट्याणीयस्यां स्थवीयसीमतिषज्येति। पृ० ५८०

५५. काठके—उप देवानिति पशुमुपाकरोति प्रत्यङ्मुखमिति। पृ० ५८१

५६. द्विशृङ्गैकशृङ्गाभ्यामिति काठके । पृ० ५८७

५७. अथ कठसूत्रे विशेषः—प्रमुच्य यूपात् पशुं यन्त्युल्मुकहस्तोऽग्रत आग्नीध्र उत्तरस्मिन् वेद्यन्ते पशुमवस्थितं द्विशृङ्गैकशृङ्गाभ्यां वपाश्रपणीभ्यां मुखमभिनिधायाश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इति संचरेण निष्क्रम्य रेवति प्रेत्यनुमन्त्रयत इति । पृ० ५८८

५८. काठके च—चरमेऽङ्गारे वपां निगृह्यान्तरा यूपाग्नी हृत्वाभिघार्य श्रपयतीति । पृ० ५९३

५९. काठके च—प्रस्तुतासु स्तोकेभ्योऽनुब्रूहीति श्येनीं सुशृतां वेद्यां दर्भेषूदगग्रेषु निधायेति । पृ० ५९३

६०. आपस्तम्बेन तु आहवनीयस्य दक्षिणत एव नीत्वा दक्षिणस्यां वेदिश्रोण्यां बर्हिषि प्लक्षशाखायां वपाया आसादनमुक्तम् । कठसूत्रे चोदगग्रेषु दर्भेषु । पृ० ५९४

६१. काठके च—स्वाहाकृतीरिष्ट्वा प्रत्याक्रम्याभिघारयति ध्रुवां पृषदाज्यं वपां नोपभृतं तमाज्यभागाविष्टेति । पृ० ५९४

६२. काठके च—असिना वपां सकृदवदाय द्विरभिघार्येति । पृ० ५९५

६३. काठके च—स्थाल्यामवदानानि श्रपयति शूले हृदयमसम्भिन्ने वृकावनिर्वृडिते गुदवनिष्ठु । गर्तं खात्वा तस्मिन्नूवध्यं कुर्यात् पशुपुरोडाशाय पात्रशेषं प्रयुनक्ति । यद्देवत्यः पशुस्तद्देवत्यं व्रीहिमयमेकादशकपालं वा । प्रणयनादि तुल्यमाप्त्येभ्यो व्युह्य बर्हिराप्त्येभ्यो निनयति । शृते पशौ पशुंपुरोडाशेन प्रचरति यदि बहवः पशवः पशुपुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदायाभिघार्योपभृत्यवदायानभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारयेद्, यत्र क्व च सहोपभृत् तदेवमेव कुर्यात् । इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीत्याश्राव्याहेन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति । इष्टे स्विष्टकृता प्रचरत्यग्नये पुरोडाशस्येति सम्प्रैषः पुरोडाशयोः पुरोडाशानामिति चेडामुपहूय पृषदाज्यस्य स्रुवेण वेदोपयामेनादायाह शृतं हविः शमितारिति शृतमिति शमिता प्रत्याहैवं मध्य एवं गत्वेति । पृ० ६०१

६४. काठके च—प्रवृह्य शूलाद्धृदयमभिघारयति पशुं चेति । पृ० ६०८

६५. काठके च—अग्रे हृदयस्यावद्यत्याह मनोताया इति । पृ० ६१०

६६. कठसूत्रे—सौविष्टकृतानामेव सर्वेषां त्रिरिति । पृ० ६१०

६७. प्राशित्रं तु कात्यायनापस्तम्बमानवकठसूत्रेषु शतपथे च पठितं नास्ति । पृ० ६११

६८. काठके च—सकृच्चतुर्वावदाय वनस्पतिना चरतीति । पृ० ६१२

६९. काठके—आहरत्याग्नीध्रः पशुश्रपणादङ्गारान् पूर्वेणाध्वर्युं कृत्वोत्तरस्यां वेदिश्रोण्यां व्युह्य बर्हिर्निवपति तत्रोपयज इति । पृ० ६१५

७०. काठके—तत्रोपयजः पृषदाज्येनैकादशानुयाजान् प्रत्याहुति गुदकाण्डस्यासम्भिन्दन्नक्ष्णयावदाय समुद्रं गच्छ स्वाहेति प्रतिमन्त्रमिति । पृ० ६१५

७१. काठके च—संस्थितयजुर्हुत्वा जुह्वा स्वरुं जुहोत्यनुपस्तीर्णमनभिघारितं द्यां ते धूम इति । पृ० ६१६

७२. काठके च—अथाग्निष्टोमस्य पुण्याहे दीक्षा पर्वणि सुत्यामावास्ये वा संस्थिते दीक्षा पुण्याहे सुत्येति । पृ० ६३२

७३. काठके च—पत्नी यजमानश्चाश्नीत इति । पृ० ६३५

७४. काठके च—तीर्थेनावसृप्य शं नय इति स्नात्वोदिदाभ्य इत्युत्क्रम्येति । पृ० ६३६

७५. काठके—उच्चैः प्रवर्ग्येण चरतीति । पृ० ६३९

७६. काठके—अपरेणाग्निं कृष्णाजिने आस्तीर्यान्तर्मांसे बहिर्लोम्नी यद्येकं स्याद्दक्षिणं पूर्वपादं प्रतिषीव्येदिति । पृ० ६४४

७७. कठसूत्रे—विष्णोः शर्मेति क्षौमान्तेन शिरः प्रच्छादयति जालं पत्न्याः शिरसीति । पृ० ६४५

७८. तथा च काठके–क्षौमान्तेन शिरः प्रच्छादयति जालं पत्न्याः शिरसीति । पृ० ६४६

७९. काठके च—दैवीं धियमिति मार्जयते इति । पृ० ६५०

८०. काठके च—यदि प्राक्कालादङ्गुलीर्वाचं वोत्सृजेदिदं विष्णुर्विचक्रमे बृहस्पते जुषस्व नस्त्वमग्ने व्रतपा असीत्यग्निमुपस्थायेति । पृ० ६५२

८१. एवमेव कठसूत्रेऽपि । पृ० ६५३
एवमिति विस्तरस्तत्रैव प्रकरणे द्रष्टव्यः ।

८२. एवं मानवकठसूत्रयोरपि । पृ० ६५४

८३. काठके—सोमक्रयणीं बभ्रुमेकहायनीं ज्यायसीं वेति । पृ० ६५८

८४. कठसूत्रे—तस्य दक्षिणेषु सप्तसु पूर्वपदेषु लक्षणं कुरुते । पृ० ६५९

८५. काठके च—न विचीयमानं प्रेक्षेरन्निति । पृ० ६६१

८६. अपरेण ब्रह्मयजमानौ दक्षिणतः शकट[म]न्वारभ्याह सोमाये-त्यादि काठके । पृ० ६६८

८७. मानवलौगाक्ष्यापस्तम्बसूत्रेषु अत्र सुब्रह्मण्य सुब्रह्मण्यामाह्वयेत्येवं प्रैष उक्तोऽस्ति । पृ० ६६९

८८. काठके च—वरुणस्य स्कम्भसर्जन्यसीति शम्यां प्रवृहयति प्रउक्त इति योक्त्रपाशं प्रमुच्य प्रविश्य पत्नीमन्वारम्भयित्वा निर्वपति वैष्णवं नवक-पालमग्नेस्तनूरिति पञ्चकृत्वः सावित्रादिभिस्तुल्येनोत्तरं विमुञ्चति वरुणोऽसीति सोममादत्त इत्यादि । प्रोक्षणादि तुल्येडान्ता सन्तिष्ठत इति च । पृ० ६७३

८९. अत्र कठसूत्रे विशेषः—गार्हपत्ये तप्तानां दीक्षितस्योदकार्थो दक्षि-णाग्नौ पत्न्या इति । पृ० ६७४

९०. काठके—सच्छदिष्कयोर्हविर्धानयोर्ग्रन्थीन् विचृत्य प्रक्षाल्याभ्यज्याभितः पृष्ठ्यामवस्थाप्येति । पृ० ६९१

९१. काठके च—त्रिरनूक्तेऽनूदुगृह्णन्तो वर्तयन्तीति । पृ० ६९३

९२. कठसूत्रे—द्विपुरुषया पञ्चाङ्ग्या हविर्धानं विदध्यादनःसंमितं वेष स्याद् द्विप्रादेशया पञ्चाङ्ग्योपरवान् विदध्याद् द्विप्रादेशोपरवेषु पृष्ठ्या प्रादेशं द्वेधं सम्भुज्यार्धप्रादेशेन परिलिखेद् दशपदया पञ्चाङ्ग्योत्तरवेदिं विदध्यात् चतुःशय्या पञ्चाङ्ग्याग्नीध्रीयं विदध्यात् त्रिपदया पञ्चाङ्ग्या धिष्ण्यान् विदध्यादष्टादशशय्या पञ्चाङ्ग्या सदो विदध्यादिति । पृ० ६९६

९३. काठके—दक्षिणस्य प्रत्यगुपस्तम्भनादिति । पृ० ६९७

९४. काठके—बाहुमात्रान् खनन्त्यसम्भिन्दन्तोऽधस्तात् सम्भिन्दन्ति । पृ० ६९८

९५. काठके—अध्वर्युयजमानौ संविमृशतो द्वा अन्यो द्वा अन्यः किमत्रेत्य-ध्वर्युर्यजमानो भद्रमिति प्रत्याह तस्मौ सहेत्युभावुपस्पृश्येति । पृ० ६९९

९६. काठके—अधिषवणे फलके पुरस्तादंहीयसी पश्चाद् वरीयसी द्व्यङ्गुले वा संहिते पश्चाद् रक्षोहणा इति प्रोक्षत्युत्तरेणोपरवेषूपदधाति । उत्तरेण पुरीषेण पर्युह्य शङ्कुभिः परिणिहत्येति । पृ० ७००

९७. काठके—पूर्वेणोपस्तम्भनं पात्रेभ्यः खरं करोतीति । पृ० ७०१

९८. काठके—अर्धपञ्चमेषु पृष्ठ्याया दाक्षिणा मध्य औदुम्बर्यै गर्तं परिलिखतीति । पृ० ७०१

९९. काठके च—न प्रत्यक् सदोऽतीयादध्वर्युः समया यद्यतीयात् क्षेत्रस्य पत इति प्रतिसंचरेदिति । पृ० ७०५

१००. काठके—प्रत्यगुदग्घविर्धानादाग्नीध्रचां शालामर्धमन्तर्वेद्यर्धं बहिर्वेदि प्रागपरस्माद् वेद्यन्तात् सदो नवशयं प्राक् सप्तविंशतिस्तिर्यगिति । पृ० ७०६

१०१. काठके च—रौद्रेणेत्यनुषङ्गः सर्वत्रेति । पृ० ७०७

१०२. अत्र काठके विशेषः—वेदिशेषं स्तृणाति ससदोहविर्धानं धिष्ण्यखरवर्जमिति । पृ० ७०९

१०३. काठके च वत्सापाकरणस्य कालान्तरमुक्तम्—वत्सानपाकृत्य प्रवर्ग्यवति पात्राण्युद्वास्याग्निकर्मणाग्निं प्रणीयेति । पृ० ७१०

१०४. कठसूत्र एतेषां सर्वेषामग्नीषोमीयपात्रैः सहासादनं प्रोक्षणं नयनं च विहितमस्ति । पृ० ७१२

१०५. काठके—आग्नीध्रीये धिष्ण्ये प्रत्यङ् तिष्ठन्निधायाग्ने नयेति जुहोत्यत्र ग्रावबायव्यानि सादयन्त्यासन्दीं चेति । पृ० ७१३

१०६. काठके—प्रत्यङ् धिष्ण्यानतिसर्पेदध्वर्युरिति । पृ० ७१४

१०७. तथा च काठके—यदि बहवः पशवः पुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदायाभिघार्योपभृत्यवदायाभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारयेद् यत्र कचन सहोपभृदेवमेव कुर्यादिति । पृ० ७२३

१०८. कठसूत्रे—मार्जयित्वा वसतीवरीर्गृह्णाति वहन्तीनां कुम्भेन प्रतीपस्तिष्ठन् छायायां दर्भैरन्तर्धाय हविष्मतीरिति पूरयित्वान्यैरपिधाय संचरेण प्रविश्यापरेण गार्हपत्यमग्ने्र्वे इति निधायेति । पृ० ७२७

१०९. नाग्नीषोमीये हृदयशूलं करोति न सवनीये न स्वरुमनुप्रहरति नान्तरापो देवयजनं च पथा व्यवेयात् प्रागस्तमयान्निष्क्रम्य वसतीवरीर्गृह्णाति वहन्तीनां प्रतीपस्तिष्ठन् प्रतीपं कलशमुपमारयतीति कठसूत्रेऽप्ययमेव क्रम उक्तोऽस्ति । पृ० ७२८

११०. काठके—संस्थिते वसतीवरीः परिहरति व्युत्कामतेत्युक्त्वापरेण विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा दक्षिणस्यामुत्तरवेदिश्रोण्यां सादयतीन्द्राग्न्योरिति यथेतं परेत्यापरेणाग्नीध्रीयमग्निं विश्वेषां देवानामिति सादयतीति। पृ० ७२९

१११. काठके च—ऐन्द्रं दोहयति वत्सानपाकृत्याग्नीध्रीये यजमानो वसतीति। पृ० ७३१

११२. काठके—देवेभ्यः प्रातर्यावभ्योऽनुब्रूहि ब्रह्मन् वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यां पैतापुत्रीयामाह्वयेति प्रेष्यतीति। पृ० ७३४

११३. काठके—दधि सक्तवः करम्भः सक्तवः परीवाप इति। पृ० ७३४

११४. मानवकठसूत्रयोः प्रतिप्रस्थातः सवनीयान् निर्वपस्वेति प्रेषणपूर्वकं प्रतिप्रस्थातृकर्तृकत्वमुक्तमास्ति। पृ० ७३४

११५. कठसूत्रे—दक्षिणश्रोण्यामुक्थ्यस्थालीं पूर्वमुक्थ्यपात्रमुत्तरस्यां श्रोण्यामादित्यस्थालीं पूर्वमादित्यपात्रमिति। पृ० ७३६

११६. काठके—वायव्यानि हस्तपाणिप्रादेशमात्राणि तृतीयमात्रखातानि नानालक्षणानि वैकङ्कतं मन्थिपात्रमाश्वत्थे उभयतोमुखे ऋतुपात्रे स्रुक्पात्ररूपे तयोरश्वस्येव शफोऽधस्तादिति। पृ० ७३६

११७. स्रुक्पात्रमात्रं पारिप्लवं चतस्रो ग्रहस्थालीरिति काठके। पृ० ७३७

११८. काठके—शुक्लोर्णानां विचितकेशानामूते पवित्रे प्रादेशमात्रारत्निमात्रे इति। पृ० ७३७

११९. कठसूत्रे—आधवनीयपूतभृतौ च कुम्भौ सोदञ्चनौ सापिधानावपरमाधवनीयामिति। पृ० ७३८

१२०. काठके—नैयग्रोधाश्मसा रौहीतका वा सर्वाणि वा पर्णमयानीति। पृ० ७३८

१२१. कठमंत्रसूत्रयोस्तु प्रतिग्रहणं द्वयोर्द्वयोरेवान्तर्धानमुक्तम्। पृ० ७४५

१२२. काठके—श्वात्रा स्थेति होतृचमसात् सोमं स्नेहयित्वा तस्य षडंशून् प्रतिप्रस्थाता सव्ये पाणावभिषजति द्वौ द्वावसंश्लिष्टौ तस्मिन्नुपांशुपात्रमादायेति। तथा—अभिषुणुयादष्टकृत्व उपांसुसवनपाणिरञ्जलिनोपांशुपात्रं सोममासिञ्चति वाचस्पतये पवस्वेति प्रवृहांशून् प्रतिप्रस्थानान्तर्दधाति देवो देवानामिति प्रत्यभिषजति भूयसीरासिच्यैका-

दशकृत्वोऽभिषुत्यैवमासिञ्चति । एवमन्यौ प्रतिप्रस्थाता भूयसी-
रासिच्य द्वादशकृत्वोऽभिषुत्यैवमासिञ्चतीति । पृ० ७४५

१२३. काठके—ग्रहमादाय स्वांकृत इत्युत्थायोर्वन्तरिक्षमिति दक्षिणा परि-
क्रम्य दक्षिणार्धेऽग्नेर्ऋजुस्तिष्ठन् सर्वंहुतामित्यादि । पृ० ७४६

१२४. काठके—ऋजीषेण ग्राव्णः प्रच्छाद्याधोऽक्षं द्रोणकलशमुदूगातारः
प्रोह्यान्तराक्षविष्कम्भौ दशापवित्रं न्यस्यत्याहिते द्रोणकलशे वितते
पवित्र आधवनीयाद्धोतृचमसं पूरयित्वासिञ्चति सन्ततं स्रवन्त्या
ग्रहान् गृह्णातीति । पृ० ७५१

१२५. अत्र कठसूत्रे—तुल्यमुपांशुनासादनादुत्तरार्धे होम इति । पृ० ७५३

१२६. तथा च काठके—ये देवा इत्थाग्रयणं द्वयोर्धारयोराग्रयणाद् द्विती-
यामिति । पृ० ७५५

१२७. काठके—प्रत्यङ्मुखोऽध्वर्युः प्रस्तोत्रे दर्भान् प्रयच्छन्नाह सोमः पवत इति
प्रातःसवने । तुल्यमासर्पणात्सदसि प्रस्तोत्रे दर्भान् प्रयच्छन्नाह सोमः
पवत इति माध्यंदिने । एवंविधमेव तृतीयसवनेऽपि सूत्रमस्ति ।
पृ० ७५८

२८. काठके—आश्विनं गृह्णाति या वां कशेति द्रोणकलशात् पारिप्लवेनै-
तस्मादत ऊर्ध्वं प्रातःसवने गृह्णीयात् मरुत्वतीयमाहेन्द्रौ च माध्यंदिन
इति । पृ० ७६०

१२९. काठके—नूर्वामं दिव इति ध्रुवं ध्रुवोऽसीति सादयति, तं प्रत्यङ्मुखो
राजपुत्रो रक्षेदिति । पृ० ७६१

१३०. काठके—आग्नेयमजं सवनीयमुपाकरोति तुल्यमाश्रावणादाश्राव्य
होतारं वृणीत एवमितरान् इन्द्रं होतारं होत्रादिति होतुरग्निराग्नीध्रादि-
त्यग्नीधो वरणमश्विनाध्वर्यू आध्वर्यवादित्यध्वर्योर्मित्रावरुणौ प्रशा-
स्तारौ प्रशास्त्रादिति प्रशास्तुरिन्द्रो ब्रह्मा ब्राह्मणादिति ब्राह्मणाछंसिनो
मरुतः पोत्रादिति पोतुर्ग्रावो नेष्टारो नेष्ट्रादिति नेष्टुर्ग्ना नेष्ट्रादिति वा ।
अग्निर्हं दैवीनां विशां पुरएतायं सुन्वन् यजमानो मनुष्याणामिति गृह-
पतेः । सकृदाश्राव्य होतारं वृणीते नामधेयैरितरान् मन्त्रेण गृहपतिमि-
त्येक इति । पृ० ७६२

१३१. कठमैत्रसूत्रयोरनेन द्विवचनान्तेनैव प्रशास्तुर्वरणविधानात् । मित्रा-

वरुणौ प्रशास्तारौ प्राशास्त्रादिति प्रशास्तुरिति काठके । पृ० ७६३

१३२. कठमैत्रसूत्रयोरित्थमेव पाठदर्शनात् । पृ० ७६३

१३३. वपामार्जनान्ते कठसूत्रे सर्वेषां भोजनमुक्तं—मार्जयित्वा भुक्त्वा प्रक्षालितपादा ग्रहानवेक्षन्त इति । पृ० ७६५

१३४. काठके च सहानुवाचनम—पुरोडाशादीनां पयस्यान्तानामवद्यन् प्रातः प्रातःसवस्येन्द्राय पुरोडाशानामनुब्रूहीत्यवदीयमानानामिति लौगाक्षिरिति । पृ० ७६६

१३५. काठके—इष्टे स्विष्टकृता प्रचरत्यग्नये पुरोडाशानामिति सम्प्रैष इति । पृ० ७६७

१३६. कठमैत्रसूत्रयोस्तु उभयत्रानुहोमो विहितः । तथा च काठके—द्विदेवत्यैश्चरतोऽर्धमैन्द्रवायवस्य प्रतिप्रस्थातादित्यपात्रे गृह्णात्युपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वेति वायव इन्द्रवायुभ्यामिति सम्प्रैषस्ताभ्यां चरत उत्तरः प्रतिप्रस्थातैवं सर्वत्र युगपत्प्रचरणेषूत्तर एव प्रतिप्रस्थाता द्विरिष्ट्वाध्वर्युपात्रे शेषमासिच्य तस्यार्धमादित्यपात्रेणादित्यस्थाल्यामासिञ्चतीति । पृ० ७६८

१३७. काठके—होतृचमसमुख्यानुन्नयति नाच्छावाकचमसमिति । पृ० ७७०

१३८. तथा च काठके—अनूद्यच्छन्ते चमसानाश्राव्याहेति । तथा—ब्रह्मोद्गातृहोतृयजमानचमसानां द्विर्यजति सकृदितरेषां द्विर्हुतान् सदो हरन्ति सकृद्धुतान् द्विर्द्विर्यजत्याश्राव प्रशास्तर्यजेति प्रशास्तुः सम्प्रैषो ब्रह्मन् यजेति ब्राह्मणाच्छंसिनः पोतर्यजेति पोतुः नेष्टर्यजेति नेष्टुरग्नीद्यजेत्यग्नीधस्तान् सदो हरत्ययाडग्नीदित्युक्त्वा द्विदेवत्यान् सम्भक्षयत इति ।

पृ० ७७१

१३९. काठके—आग्नीध्रे पुरोडाशान् भक्षयति घृताक्तान् यजमानो हविष्यं पत्नी भुंक्त इति । पृ० ७८१

१४०. काठके—प्रपद्यमानः प्रतिप्रस्थाता दक्षिणेनाध्वर्योः पात्रं हरेदुत्तर एव संचरेदिति । पृ० ७८२

१४१. काठके विशेषः—द्वारे हविर्धानस्योपविश्याध्वर्यू यजतमित्युक्तेऽश्विनावध्वर्यू यजत आध्वर्यवादृतुना सोमं पिबतामिति होतारं वा प्रेष्येद् होतरेतद् यजेति यद्यध्वर्युर्यजेतोन्नेता ग्रहेण चरेदिति । पृ० ७८३

१४२. कठसूत्रे—शेषं सम्भक्षयतो होत्रा पोत्रा नेष्ट्राग्नीध्रा ब्राह्मणाछंसिना मैत्रावरुणेनेतीतरथा पात्रं पर्यस्य होत्रा पोत्रा नेष्ट्राछावाकेनेति यथा-पूर्वं पात्रं कृत्वाऽध्वर्युणा यथालोकं यजमानेन चेति । ७८४

१४३. काठके—आह्वयते होता प्राङ्मुखमध्वर्युं सदोबिल आसीनं शोंसावो दैवेति प्रदक्षिणमावृत्य प्रत्यङ् तिष्ठन् प्रह्वः प्रतिगृणातीति । पृ० ७८५

१४४. एवमेव काठकेऽपि—स्तुते प्रउगे वैश्वदेवेन प्रचरति शेषं सम्भक्षयतो यथाचमसं भक्षयन्ति प्रक्षाल्य मैत्रावरुणचमसमुख्यानुन्नय-न्त्युकथ्यपात्रेणोकथ्यस्थाल्या गृह्णात्युपयामगृहीतोऽसि मित्रावरुणा-भ्यां त्वेति पुनर्हविरिति स्थालीमालभ्य स्तोत्रमुपाकरोति शस्त्रेण ग्रहेण चमसैश्चरन्ति देवेभ्यस्त्वेति मुख्ये शेषमवनीय शेषं सम्भक्षयतो यथा-चमसं भक्षयन्ति प्रक्षाल्य ब्राह्मणाछंसिचमसमुख्यानुन्नयन्त्युकथ्यपा-त्रेणोकथ्यस्थाल्या गृह्णातीत्यादि । पृ० ७९०

१४५. काठके—सोमातिरेकं रक्षेत् प्रशास्तः प्रसुवेत्युक्ते यथाप्रसृप्तं निःसर्पन्ति सन्तिष्ठते प्रातःसवनमिति । पृ० ७९१

१४६. काठके—ग्रावस्तु राजानं न्युप्योष्णीषं ग्रावस्तुतेऽध्वर्यवे वसनमि-ति । पृ० ७९२

१४७. काठके—आग्रयणं तिसृणां धाराणामाग्रयणादन्तर्यामाच्चेति । पृ० ७९४

१४८. काठके—सदसि प्रस्तोत्रे दर्भान् प्रयच्छन्नाह सोमः पवत इति । पृ० ७९५

१४९. कठसूत्रे—स्तीर्णे दधिघर्मेण चरति यदि प्रवर्ग्यवान् पशुपुरोडाशेने-डान्तेन चरित्वा माध्यन्दिनीयैस्तुल्येन चरति माध्यन्दिनस्य सवनस्येति सम्प्रैष इति । पृ० ७९६

१५०. कठसूत्रेऽत्र हविष्यं पत्नी भुंक्त इति । पृ० ७९८

१५१. अत्र प्रेष्यानुब्रूहीत्येतयोः क्रियापदयोः प्रागेव प्रियेभ्य इत्यादीनामुच्चारणं कार्यमिति कर्कः । कठमैत्रसूत्रयोरेवमेव पठितमस्ति । पृ० ८०८

१५२. पत्न्या हविष्यस्याशनं पत्नीशालायाम । पत्नी हविष्यं भुंक्त इति कठसूत्रेऽत्रापि सूत्रकरणात् । पृ० ८१३

१५३. काठके च—शलाकामुष्टीनिहितानादीप्य विहरति यथापूर्वं जुह्वा-

मध्रगृहीतं धिष्ण्येषु जुहोति प्रत्यङ्ङासीनो विभत्रे प्रत्राहणाय स्वाहेत्या- दीति । पृ० ८१५

१५४. काठके—होतृचमसमुख्यान् सर्वे सोममुन्नयत्याग्रयणध्रुववर्जमल्पं होतृचमसे स्तोत्रमुपाकरोतीति । होतृचमसे ध्रुवस्यावकाशं कृत्वेति । पृ० ८१७

१५५. एवमेव काठकेऽपि । पृ० ८१८
विस्तरः प्रकरणाज्ज्ञातव्यः ।

१५६. प्रभुज्य जानुनी प्रत्युह्य वसनान्तान् कमण्डलुनेति काठके । पृ० ८१८

१५७. काठके—एवा न इति सकृदुक्तायां होतृचमसे ध्रुवमवनयति प्रत्यङ्ङा- सीन इति । पृ० ८१८

१५८. काठके तु—द्विरिष्ट्वा होतर्युन्नतर्युपहवमिच्छन्ते सर्वे धाना असम्भिन्दन्तो निर्धीय प्रक्षाल्याचम्योत्तरवेद्यां निवपेयुरिति । पृ० ८२१

१५९. अग्नौ शकलान्यादधातीति काठके । पृ० ८२२

१६०. काठके—पत्नीशाले प्रायणीयस्य निष्काषमुदयनीयमभि निर्वप- तीति । ८२७

१६१. काठके—आमिक्षा वा स्यात् तूष्णीमुपचरिताज्यभागप्रभृतीडान्ता सन्तिष्ठत इति । पृ० ८२८

१६२. काठके—शालामुखीयोत्तरवेदिकौ पृथक् समारोप्य यो वा पत्नी- शाले विहारः संचरेण निष्क्रम्याष्टाकपालमुदवसानीयं निर्वपतीति । पृ० ८२९

१६३. लौगाक्षिः—शुचिर्वाग्यतः शीली स्यान्नायज्ञियां वाचं ब्रूयाद् यदि ब्रूयाद् वैष्णवीमृचं यजुर्वा जपेदपि वा नमो विष्णव इत्येव ब्रूयादिति । पृ० ८३४

१६४. लौगाक्षिः—अग्नीषोमयोः सन्नयोः संचरेण प्रविश्यापरेण हविर्धानं दक्षिणा परिक्रम्य दक्षिणतोऽग्नेरनन्तर उपविशत्यत्रासीता मार्जनाद्धुतायां वपायां यथेतं प्रत्येत्य चात्वाले मार्जयित्वापरेणोत्तरवेदिं दक्षिणा परिक्रम्य यथास्थानमुपविशत्यतोऽत ऊर्ध्वं सञ्चर इति । पृ० ८३६

१६५. लौगाक्षिसूत्रे विशेषः—सवनीयासु प्रपद्यमानास्वनुप्रपद्यतापरेण दक्षिणं

हविर्धानं दक्षिणा परिक्रम्य दक्षिणतः सोमस्यान्तर उदङ्मुख उपविशत्यासीता सर्पणात् सर्पणकाले मैत्रावरुणमन्वारभ्य निःसृत्येति । पृ० ८३६

१६६. कठसूत्रे—ब्रह्मन् स्तोष्याम इत्युक्ते रश्मिरसीत्यनुवाक स्तोमभागाः प्रतिमन्त्रं देव सवितरित्यनुषङ्गस्तेषामेकैकं स्तोत्रेषु द्वादशाग्निष्टोमे पञ्चदशोक्थ्ये षोडश षोडशिन्युत्तरे द्वादश रात्रिपर्य्यायेषु उत्तरे त्रयो राथन्तरे सन्धौ नाप्तोर्याम्ण्यूर्ध्वमाश्विनान्न वाजपेयस्यातिरिक्तस्तोत्रे यथाब्राह्मणोक्तमेवात्रानुज्ञानामिति । पृ० ८३७

# KAṬHAKA-ŚRAUTASŪTRA FRAGMENTS

by

RAGHU VIRA

Kaṭhaka-Śrauta has yet to be discovered. Hence, any information about it is welcome. In 1928 I had gathered a few hundreds of Kaṭhaka quotations and published them the same year in the Oriental College Magazine, Lahore. During the rains of 1934 I visited Benares and Calcutta, and there I made transcripts of two manuscripts which are given below. Of these the second one is described in the Catalogue as Kaṭhaka-Śrautasūtra. Neither the colophon nor the margins of the ms. bear any testimony to it. Still I publish it, without any emendation, for the benefit of future workers.

(1) SANSKRIT COLLEGE BENARES, COLLECTION 3, BUNDLE 47

श्रीगुरुभ्यो नमः ॥

अथ कठशाखानुसारेण चातुर्मास्यानां पाञ्चाह्निकः प्रयोगः ॥ तत्र फाल्गुनशुक्लैकादश्यां वैश्वानरपार्जन्येष्टिं विधाय वैश्वदेवं पर्व ॥ तस्मिन्नेवाहनि वरुणप्रघासार्थमुद्धरणम् ॥ द्वादश्यां वरुणप्रघासाः ॥ त्रयोदश्यामनीकवत्यादि गृहमेधीयेष्टिपर्यन्तम् ॥ चतुर्दश्यां दर्विहोमादिसाकमेधसमाप्ति ॥ पूर्णिमायां शुनासीरीयम् ॥ इति पञ्चाह्निकानि ॥

* * *

## (2) ASIATIC SOCIETY OF BENGAL, MS. NO. 3493

श्रीगणेशाय नमः ॥ दिवःश्येनीभिरन्वहं स्वर्गकामो यजेत । दिवःश्येनयो नाम सप्तेष्टयः । ताभिः शुक्लपक्षं[1] प्रतिपद्यारभ्य सप्ताहं यजेत । अन्वहमेकैकया त्रिहविष्कया । अग्नये कामायाष्टाकपालम् । आशायै चरुम् । अनुमत्यै चरुम् । इति प्रथमा । सर्वास्वाद्योत्तमे तुल्ये हविषी । मध्ये विशेषः । कामाय ब्रह्मणे यज्ञायाक्रुथो ऽग्नये बलिमते अनुवित्त्यै । एता द्वितीयादिष्विष्टिषु यथाक्रमं द्वितीयाः प्रादेष्टाः । प्रतीष्ट्युपहोमा आम्नाताः सो ऽत्र जुहोतीति । तस्य कर्म । शुक्लपक्षे प्रथमायामामावास्येनेष्ट्वा दिवःश्येनीभिर्यक्ष्ये स्वर्गं लोकमवाप्नवानीति संकल्पः । दैवःश्येनꣳ हविः । सर्वं पौर्णमासवत् । अग्नये काय जुष्टं निर्वपामि । आशायै जुष्टं॰ । अनुमत्यै जुष्टं॰ ॥

अग्ने काम हव्यꣳ रक्षस्वाशे हव्यꣳ रक्षस्वानुमते हव्यꣳ रक्षस्व । निर्वापवत् प्रोक्षणम् । प्रोक्षामीति विशेषः । उत्करे त्रिर्निनीय यथाभागं व्यावर्त्तध्वम्, इदमग्नेः कामस्येति पेषणार्थान् । इदमाशाया अनुमत्या इति चर्वर्थान् । अग्नये कामाय जुष्टमधिवपामि । कपालान्युपधाय चरुद्वयम् । अग्नये कामाय जुष्टꣳ संवपामि । पुरोडाशमधिश्रित्य चरुद्वयं घर्मोसीति ।

आप्यलेपादि पुरोडाशेन प्रचर्य । आशाया अनुब्रूहि । आशां यज । आशाया अहमन्नादः । एवमनुमतेः । तुभ्यं ता अश्यांमतमिति कामस्य । आशानां त्वा विश्वा आशा इत्याशायाः । अनु नो ऽद्यानुमतिरन्विदनुमते त्वमित्यनुमतेः । नारिष्ठान् हुत्वा अग्नये कामाय स्वाहा आशायै स्वाहा अनुमत्यै स्वाहा प्रजापतये स्वाहा स्वर्गाय लोकाय स्वाहा अग्नये स्विष्टकृते स्वाहेति हुत्वा स्विष्टकृतं यजति । हव्यवाहं स्विष्टमिति स्विष्टकृतः ।

अत्रेष्टौ दक्षिणाकाले पष्ठौही वरान् कंसपात्रमाभरणं कांचीनूपुरादि एतान्यन्तर्वेदि स्थापयित्वा नपुंसकब×स×हु वचनेनोहः । ब्रह्माणि ब्रह्माणि स्थ ब्रह्मणे वो मामासिꣳ सिष्टाहुतानि मह्यꣳ शिवानि भवत । सहस्रधाराण्युत्सानि अक्षीयमाणानि । तानि दध्रुः पृथिवीमन्तरिक्षं दिवं च । तैः पष्ठौहीकंसनूपुरा-

1 The ms. has a marginal note: शुक्लपक्षस्य पृथक्कृत्यानुवादो ऽयम् । यं कामयेत पापीयान्त्स्यादिति तमपरपक्षे याजयेत् । पापीयानेव भवति । यं कामयेत वसीयान्त्स्यादिति तं पूर्वपक्षे याजयेत् । वसीयानेव भवति । इत्यादिश्रुत्या सर्वशुक्लपक्षस्य काम्यकर्मकालत्वेनोपदिष्टत्वाच्छुक्लपक्षः सर्वो ऽपि काम्येष्टीनां कालः ॥





दिभिरतितराणि मृत्युम् । १ ब्राह्मणा इमानि वः पष्ठौहीकंसनूपुरादीनि । ब्राह्मणतर्पणान्तम् । सप्तेष्टयो नानाहवनीयाः कालभेदात् । केचिदेकाहवनीया इति एकं कामेष्ट्ययनमिति । नानाहवनीयपक्षे अन्वहं संकल्पादि । अन्यपक्षे आदावेव संकल्पः । नानाहवनीयपक्षे इष्ट्या यक्ष्ये इति प्रथमवर्जानाम् । दैवःश्येनꣳ हविः । एकाहवनीयपक्षे ऽपि तथैव । श्वोभूते संकल्पादि पूर्ववत् । तत्र विशेषः । प्रथमतृतीयौ पूर्ववत् । द्वितीयं कामाय चरुम् । निर्वापादि द्वितीयवर्जं पूर्ववद् याज्यानुवाक्याश्च । कामो भूतस्य कामस्तदग्र इति कामस्य । नारिष्ठान् हुत्वा उपहोमः पूर्ववत् । कामाय स्वाहेति द्वितीयः इति विशेषः । स्विष्टकृदादि पूर्ववत् । ब्राह्मणतर्पणान्तम् ॥ १ ॥

श्वोभूते सर्वं पूर्ववत् । द्वितीयस्तु ब्रह्मणे चरुमिति विशेषः । ब्रह्म जज्ञान पिता विराजामिति द्वितीयस्य याज्यानुवाक्ये । उपहोमे ब्रह्मणे स्वाहेति द्वितीयाहुतिः । पूर्ववद्दक्षिणा ॥

श्वोभूते संकल्पादि पूर्ववत् । द्वितीयं यज्ञाय चरुम् । एतावान् विशेषः । यज्ञो रायो यं यज्ञः इति यज्ञस्य । यज्ञाय स्वाहेति द्वितीयाहुतिः ॥

श्वोभूते पूर्ववत् सर्वम् । द्वितीयमक्रुथश्चरुम् । आपो भद्रा आदित्यश्यामि इत्यक्रुथः । अक्रुथः स्वाहेति द्वितीयः ।

श्वोभूते पूर्ववत् संकल्पादि । द्वितीयमग्नये बळिमते चरुम् । तुभ्यं भरन्ति यो देह्यः इत्यग्नेर्बळिमतः । अग्नये बलिमते स्वाहेति द्वितीयः ॥

श्वोभूते सप्तम्यां पूर्ववत् । अनुवित्त्यै चरुमिति विशेषः । पूर्वं देवा अपरेण प्राणापानावित्यनुवित्याः अनुवित्त्यै स्वाहेति द्वितीयः । पूर्ववद्दक्षिणा । ब्राह्मणतर्पणान्तम् । आप ऐन्द्राग्नविकाराः । शिष्टाः सर्वा आग्नेयविकाराः ।

दिवःश्येनयः समाप्ताः ॥

तत्र श्लोकौ—

इष्ट्वामावास्यया तस्मिन् प्रथमायामुपक्रमः ।
दिवःश्येनीभिर्यक्ष्ये च दैवःश्येनं हविस्तथा ॥
आप ऐन्द्राग्नधर्माणः शिष्टा आग्नेयधर्मकाः ।
पष्ठौह्यादि यथाश्रक्षं स्त्रियाभरणमेव च ॥

# काठकश्रौतसूत्रसङ्कलनम्*

काठके—ग्रन्थिं कृत्वा पुरस्तात् प्रत्यश्चमपकर्षतीति । पृ० ५२

काठके—अष्टादशदारुं शुष्कं समानवृक्षस्य सन्नह्यति विंशतिमिष्टौ पशुबन्धे चेति । पृ० ५२

लौगाक्षिः—वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्टयोपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायम्य शुल्वात् प्रादेशे छित्त्वाग्राणीध्मे निधायोत्करे मूलानि ततो वेदिकरणमिति । पृ० ५५

अत एव मैत्रकठापस्तम्बसूत्रेषु वैकङ्कती ध्रुवेति पठ्यते । पृ० ५६

लोकाच्छेषस्य प्रतिपत्तिरिति कठसूत्रात् । पृ० ५६

मण्डनः—रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः ।
कुर्वीत चमसांस्तेषामभावेऽन्यद्रुमोद्भवान् ॥
आश्वत्थं वारणं नो चेदिडापात्रमिहान्यजम् ।
अग्निहोत्रहवण्यत्र ग्राह्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या द्वयाभावेऽन्यवृक्षजा ॥ इति । पृ० ६१

काठके—अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्यतया निर्वपणमितरासां बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद् वैकङ्कती ध्रुवा शमीभूर्जमय्यो वा त्वक्नोबिला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्चमसा रौहीतका वा

* Quotations are taken from the commentaries of Karka and Yājñikadeva on Kātyāyana Śrautasūtra, edited by A. Weber, Berlin. 1859.



सर्वाणि वा पर्णमयानि स्फ्यस्रुवशम्यं खादिरं प्राशित्रहरणं च यद्वा यज्ञियानां पात्रीडाचमसं लोकाच्छेषस्य प्रतिपत्तिरिति । पृ० ६१

तदुक्तं मण्डनमिश्रैः—छिन्नं लूनं च पिष्टं च सान्नाय्यं मृन्मयं तथा ।
लोकसिद्धं गृहीतं चेन्मन्त्रा जाप्याः कठाशयात् ॥
पृ० १६५

काठके—पूर्वो पौर्णमासीमुपवसेददर्शनेऽमावास्यामिति । पृ० १६६

काठके—तस्मात्तृणमादायोभयतः प्रतिछिद्य दक्षिणा प्रत्यक्तृणं निरस्यतीति । पृ० १७७

साङ्गारेण भस्मनेति काठके । पृ० २०५

काठके—वेदं करोति दर्भमुष्टिं प्रसव्यमावेष्टयोपभुज्याग्राणां शुल्वं कृत्वा त्रिः परिहृत्य गुणेषु शुल्वान्तमवकृष्यायम्य शुल्वात्प्रादेशे छित्त्वाग्राणीध्मे निधायोत्करे मूलानीति । पृ० २०६

काठके च—पुरस्तात्प्रस्तरादनन्तर्गर्भौ विधृती आदाय वेद्यामुदञ्चौ निधायेति । पृ० २२८

काठके च—लेपाद् द्विरुपस्तारः सकृत्पुरोडाशावदानं लेपाद् द्विरभिघारणमिति । पृ० २६२

काठके—पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् । पिता प्रेतः स्यात्पितामहो जीवेत्पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यादिति । पृ० २६४

कठसूत्रे—पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति ।
पृ० ३५०

काठके च—आधानं चेत्पौर्णमास्यां पूर्वां तनूदेवताभ्य उपवसेदुत्तरामन्वारम्भणीयायै पर्वणे चेति । पृ० ३५५

लौगाक्षिः—पौर्णमास्यामादधानः पूर्वामुपोष्याधायाग्न्याधेयेष्टिभिरिष्ट्वा जुह्वदग्निहोत्रमुपतिष्ठमानो वसति श्वोऽन्वारम्भणीया पौर्णमासं चेति ।
पृ० ३५५

पुत्रस्य नाम गृह्णाति पुत्रयोः पुत्राणां वा प्रियतमस्येति लौगाक्षिरिति काठके । पृ० ३६३

तत्र प्रकारद्वयम् — होमाद्यर्थमुद्धृतान् सम्भाव्य प्रवत्स्यदुपस्थानैनैवोपस्थानमिति कठसूत्रे । पृ० ३६७

कठसूत्रे विशेषः — प्रवसत उपस्थानं याजमानं चेत्येके नेति लौगाक्षिः । प्रवसन् यदा हुतं मन्येताथ भुञ्जीत । पर्वण्युपोष्य यदा संस्थितं मन्येताथ भुञ्जीतेति । तथा — अनुपस्थाय प्रवसन् प्रवत्स्यदुपस्थानेन प्रतिदिशमुपतिष्ठेतेति । तथा — यदाऽग्निहोत्रे संस्थिते वा तन्त्र आगच्छेदागतोपस्थानमेवास्य तदहः स्यान्न नित्यमग्न्युपस्थानं न याजमानमित्येके । विसंस्थिते वा तन्त्र आगच्छेदागतोपस्थानेनोपस्थाय यदतीतं याजमानं तज्जपेन्नातीतं जपेदिति लौगाक्षिरिति । पृ० ३६६

कठसूत्रेऽप्येवमेवोक्तमास्ते — श्वो भूते तुल्यमा निर्वपणादिति । पृ० ४२६

तथा काठके — अग्नये वैश्वानराय द्वादशकपालमिति । पृ० ४२६

तथा काठके ( मानवे ) च — सद्यः पौर्णमासीं संस्थाप्य केशान् वपति श्मश्रूणीति । [तथा] त्रिःश्वेतया शलल्या लोहायसेन क्षुरेण निवर्तयतीति । पृ० ४३५

काठके च — ब्रह्मचारिव्रतो भवत्यासमापनादधःशायी मांसं स्त्रियश्च वर्जयेत् । काममृतौ जायामुपेयादिति लामकायनिनां ब्राह्मणमिति । पृ० ४३८

अत्र कठसूत्रम् — आमयवपिष्टानां करम्भपात्राणि यावन्तो यजमानस्य पुत्रपौत्रा यजमानः पत्नी च प्रतिषिद्धे एकमधिकं शृङ्गिणं मेषमशृङ्गीं मेषीं शुक्लोर्णाभिरावेष्टयेति । पृ० ४४२

एतेषां कठादीनां वारुणप्रघासिकहविर्ग्रहणकाल एवैन्द्राग्ननिर्वापानन्तरं करम्भपात्रादीनां निर्वपणं विहितमस्ति । पृ० ४४३

काठके च — उत्तरतश्चात्वालं बहिर्वेदि सम्प्रत्युत्तरवेदेस्त्रिप्रक्रमेऽपरिमिते वेति जानुदघ्नं खात्वेति च । पृ० ४४८

काठके — परिमण्डलां वेति । पृ० ४५१



काठके च — श्वो भूतेऽग्नी प्रणयते यथा पशुबन्ध इति । पृ० ४५६

तथा च काठके — त्रीन्परिधीन्पैतुदारवान् प्रादेशमात्रांस्तैरुत्तरवेदिनाभिं परिदध्यादिति । पृ० ४६०

तथा च काठके — अध्वर्युरेव सम्प्रैषान्मारुतीवर्जमिति । पृ० ४६२

काठके — यावन्तो वेष्टयेति । पृ० ४६८

काठके च — प्रतिप्रस्थाता पत्नीमाह कति ते कान्ता इति । सत्यं वदेन्निर्दिष्टांस्तान्वरुणो गृह्णात्विति [ब्रूयाद् इति] । पृ० ४७३

काठके च — तानि शूर्पेण । शूर्पहस्ता पत्न्यादित्यमुपतिष्ठते नमस्त आतानेत्यन्तर्वेदि गच्छति । अपरेण विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा पूर्वेण दक्षिणमग्निं प्रत्यञ्चौ तिष्ठन्तौ पत्नीयजमानौ शूर्पमन्वारभ्य जपं प्रघास्यान् इति द्वे यद् ग्राम इति हुत्वाक्रन्निति जपित्वा यथार्थं प्रव्रजति इति । पृ० ४७४

तथापस्तम्बः — एधोऽसीति समिध आधायाहवनीयमुपतिष्ठन्त इति । एवमेव मानवकठसूत्रयोरपि । अनपेक्षमाणा आयन्ति समिधः समिन्द्ध एधोऽसीत्यग्नौ समिधमादधातीति काठके । पृ० ४७६

काठके च — वारुण्या निष्काषेणावभृथं यन्त्युदञ्चं प्राञ्चमुरुं हि राजेति द्वाभ्यां स्थावरमुदकं गत्वा तस्य पश्चादुपविश्याग्नेरनीकमित्यप्स्वाघारमाघारयति तृणे दारुणि वा शेषेण चतुरोऽप्रबर्हिषः प्रयाजान् यजत्याज्यभागाविष्ट्वा निष्काषस्यावदाय वरुणं यत्रत्यग्नीवरुणौ स्विष्टकृद्धर्मेणोत्तरावनुयाजाविष्ट्वा देवौ यजेति प्रथमस्य सम्प्रैष आयन्ति यथा पशुबन्ध इति । पृ० ४७६

बर्हिरनुप्रहरणवर्जं वा आपस्तम्बमाकठमानवसूत्रेषु चायमेव पक्ष उक्तोऽस्ति । पृ० ४८६

सायमिति काठके । पृ० ४६१

एवमपि च मैत्रकठतैत्तिरीयसूत्रेष्वप्युक्तमस्ति । पृ० ५०२

काठके — सपवित्रे निवान्याया गोर्दुग्धं सक्तूश्चेषीकया प्रसव्यमन्वारभ्योपमन्थतीति । पृ० ५१०

काठके च — उपमूललूनं बर्हिरिति पूर्वेण दक्षिणमग्निमेकैकं पात्रं प्रयुनक्त्यपरेण ब्रह्मयजमानाविति । पृ० ५११

काठके च — अनूच्यमानायां सामिधेन्यां त्रिरिध्ममादधातीति । पृ० ५१३

यावन्तो यजमानस्य पुत्रपौत्रा इति काठके । पृ० ५३०

काठके — अथ सद्योऽग्निष्टोमाय दीक्षते पशुना वेति । पृ० ५४०

काठके — तदहः शुनासीर्यं चतुर्थ्यां मासि चतुर्षु वा मासेषु शुनासीर्येण यजेतेति । पृ० ५४४

कठानां पञ्चाहिकानि पठ्यन्ते । तत्र फाल्गुनशुक्लैकादश्यां वैश्वदेवं पर्व । तस्मिन्नेवाहनि वरुणप्रघासार्थमुद्धृत्य करम्भपात्रकरणाद्युत्तरवेदिछादनान्तम् । द्वादश्यां वरुणप्रघासाः । त्रयोदश्यामानीकवत्यादिगृहमेधीयान्तम् । चतुर्दश्यां दर्विहोमादिसाकमेधसमाप्तिः । पौर्णमास्यां शुनासीरीयमिति । एवं पाशुकान्यपि पञ्चाहिकानि भवन्ति । कठानाञ्च प्रतिपद आरभ्य क्रियन्त इति पठ्यते । पृ० ५५४

काठके — देवस्त्वेत्युक्त्वेति । पृ० ५६८

काठके — प्रागग्रे रथमात्रीं वेदिं प्राक्परिग्रहात्कृत्वा तस्याः पूर्वार्धाद् द्वात्रिंशदङ्गुलामुत्तरवेदिं चतुःस्रक्तिं प्रत्यग्यूपदेशात् पदमात्रे भूयसि वा अपरिमिता वेदिर्यदा स्याद्दशपदोत्तरवेदिः सम्भवेत्तां वेदिं कुर्यादिति लौगाक्षिरिति । पृ० ५७३

सम्भारानुत्तरनाभौ न्युप्यापि वैतदन्तं पूर्वेद्युः स्यादिति काठके । पृ० ५७३

तथा च काठके — त्रिरनूक्त उत्तरेण वेद्यन्तेन गत्वा पूर्वेणोत्तरवेदिं प्रत्यङ् तिष्ठन्नित्यादि । पृ० ५७४

काठके — आहरन्त्याज्यं पात्राण्यरणी प्रथमपरापतितं स्वर्वधिमन्थनौ च शल्कौ कार्ष्मर्यमय्यौ वपाश्रपण्यौ रशने त्रिगुणां त्रिव्यामां द्विगुणां द्विव्यामां साक्षीमध्यवदानीं स्वधितिं कुम्भीं दण्डं शूलं यूपं प्रक्षालितं पशुं स्नातं पन्नदमव्यङ्गं येन चार्थो विहारं परिस्तीर्य पात्राणि प्रयुनक्तीति । पृ० ५७५



अत्र काठके विशेषः — दधि च निर्वपति यथाज्यं द्वे उपभृन्मन्त्रे चतुर्गृहीतान्याज्यानि द्वितीयस्यामुपभृति तेज इत्युपस्तीर्य ज्योतिरसीति दध्यासिच्योत्तमाभ्यामभिघार्य शेषे घृतमासिच्य तस्य पश्वभिघारणं वनस्पतिं च यजतीति । पृ० ५७६

कठसूत्रे — प्रादेशमात्रं सम्प्रत्रेष्टयाणीयस्यां स्थवीयसीमतिषज्येति । पृ० ५८०

काठके — उप देवानिति पशुमुपाकरोति प्रत्यङ्मुखमिति । पृ० ५८१

द्विशृङ्गैकशृङ्गाभ्यामिति काठके । पृ० ५८७

अथ कठसूत्रे विशेषः — प्रमुच्य यूपात्पशुं यन्त्युल्मुकहस्तोऽग्रत आग्नीध्र उत्तरसिन्वेद्यन्ते पशुमवस्थितं द्विशृङ्गैकशृङ्गाभ्यां वपाश्रपणीभ्यां मुखमभिनिधायाश्राव्याहोपप्रेष्य होतर्हव्या देवेभ्य इति सञ्चरेण निष्क्रम्य रेवति प्रेत्यनुमन्त्रयत इति । पृ० ५८८

काठके च — चरमेऽङ्गारे वपां निगृह्यान्तरा यूपाग्नी हृत्वाभिघार्य श्रपयतीति । पृ० ५९३

काठके च — प्रस्तुतासु स्तोकेभ्योऽनुब्रूहीति श्येनीं सुश्रृतां वेद्यां दर्भेषूदगग्रेषु निधायेति । पृ० ५९३

आपस्तम्बेन तु आहवनीयस्य दक्षिणत एव नीत्वा दक्षिणस्यां वेदिश्रोण्यां बर्हिषि प्लक्षशाखायां वपाया आसादनमुक्तम् । कठसूत्रे चोदगग्रेषु दर्भेषु । पृ० ५९४

काठके च — स्वाहाकृतीरिष्ट्वा प्रत्याक्रम्याभिघारयति ध्रुवां पृषदाज्यं वपां नोपभृतं तमाज्यभागाविष्ट्वेति । पृ० ५९४

काठके च — असिना वपां सकृदवदाय द्विरभिघार्येति । पृ० ५९५

काठके च — स्थाल्यामवदानानि श्रपयति शूले हृदयमसम्भिन्ने वृकाववनिर्ऩेडिते गुदवनिष्ठु गर्तं खात्वा तस्मिन्नूवध्यं कुर्यात्पशुपुरोडाशाय पात्रशेषं प्रयुनक्ति । यद्देवत्यः पशुस्तद्देवत्यं व्रीहिमयमेकादशकपालं वा । प्रणयनादि तुल्यमाप्त्येभ्यो व्युह्य बर्हिराप्त्येभ्यो निनयति । श्रृते पशौ पशुपुरोडाशेन प्रचरति यदि बहवः पशवः पशुपुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदाया-

भिघार्योपभृत्यवदायानभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारये-यत्र क्व च सहोपभृत्तदेवमेव कुर्यात् । इन्द्राग्निभ्यां पुरोडाशस्यानुब्रूहीत्याश्रा-व्याहेन्द्राग्निभ्यां पुरोडाशस्य प्रेष्येति । इष्टे स्विष्टकृता प्रचरत्यग्नये पुरोडा-शस्येति सम्प्रैषः पुरोडाशयोः पुरोडाशानामिति चेडामुपहूय पृषदाज्यस्य स्रुवेण वेदोपयामेनादायाह शृतं हविः शमिता३रिति शृतमिति शमिता प्रत्याहैवं मध्य एवं गत्वेति । पृ० ६०५

काठके च — प्रवृह्य शूलाद्धृदयमभिघारयति पशुं चेति । पृ० ६०८

काठके — अग्रे हृदयस्यावद्यन्नाह मनोताया इति । पृ० ६१०

कठसूत्रे — सौविष्टकृतानामेव सर्वेषां द्विरिति । पृ० ६१०

प्राशित्रं तु कात्यायनापस्तम्बमानवकठसूत्रेषु शतपथे च पठितं नास्ति । पृ० ६११

काठके च — सकृच्चतुर्वावदाय वनस्पतिना चरतीति । पृ० ६१२

काठके — आहरत्याग्नीध्रः पशुश्रपणादङ्गारान्पूर्वेणाध्वर्युं कृत्वोत्तरस्यां वेदिश्रोण्यां व्युह्य बर्हिर्निवपति तत्रोपयज इति । पृ० ६१५

काठके — तत्रोपयजः पृषदाज्येनैकादशानुयाजान्प्रत्याहुति गुदकाण्ड-स्यासम्भिन्दन्नच्णयावदाय समुद्रं गच्छ स्वाहेति प्रतिमन्त्रमिति । पृ० ६१५

काठके च — संस्थितयजुर्हुत्वा जुह्वा स्वरुं जुहोत्यनुपस्तीर्णमनभिघारितं द्यां ते धूम इति । पृ० ६१६

काठके च — अथाग्निष्टोमस्य पुण्याहे दीक्षा पर्वणि सुत्यामावास्ये वा संस्थितो दीक्षा पुण्याहे सुत्येति । पृ० ६३२

काठके च — पत्नी यजमानश्चाश्नीत इति । पृ० ६३५

काठके च — तीर्थेनावसृप्य शं नय इति स्नात्वोदिदाभ्य इत्युत्क्रम्येति । पृ० ६३६

काठके — उच्चैः प्रवर्ग्येण चरतीति । पृ० ६३६

काठके — अपरेणाग्निं कृष्णाजिने आस्तीर्यान्तर्मासे बहिर्लोम्नी यद्येकं स्याद्दक्षिणं पूर्वपादं प्रतिषीव्येदिति । पृ० ६४४

कठसूत्रे — विष्णोः शर्मेति क्षौमान्तेन शिरः प्रच्छादयति जालं पत्न्याः



शिरसीति । पृ० ६४५

तथा च काठके — क्षौमान्तेन शिरः प्रच्छादयति जालं पत्न्याः शिर-सीति । पृ० ६४६

काठके च — दैवीं धियमिति मार्जयते इति । पृ० ६५०

काठके च — यदि प्राकालादङ्गुलीर्वाचं वोत्सृजेदिदं विष्णुर्विचक्रमे बृहस्पते जुषस्व नस्त्वमग्ने व्रतपा असीत्यग्निमुत्तमयेति । पृ० ६५२

मानवे च लोमतः कृष्णाजिनस्य शय्यासनमाच्छादनं च प्रतिषिद्धं निष्ठीवनं हसनमववर्षणं दन्तानिष्करणममेध्यदर्शनमपाङ्गाहनं होमोऽनृतं च प्राग्वंशादुदयास्तमयावभ्याश्रावणं च न स्यान्नक्तं मूत्रपुरीषे कुर्याद्यदि दिवा छायायां यदि हसेदपिधाय मुखमिति उदन्तीरित्यवसृष्टो जपेददब्धं चक्षु-रित्यमेध्यं दृष्ट्वा अदीक्षितवादं चेद् ब्रूयात्त्वमग्ने व्रतपा असीति जपेदकाले वाचं विसृज्य वैष्णवीमाग्नावैष्णवीं सारस्वतीं बार्हस्पत्यामित्येता निगद्य वाचं यजतीति । एवमेव कठसूत्रेऽपि । पृ० ६५३

आपस्तम्बः — चतुर आज्ययागान्प्रतिदिशं यजति पथ्यां स्वस्तिं पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतो मध्येऽदितिमिति । एवं मानवकठसूत्रयोरपि । पृ० ६५४

काठके — सोमक्रयणीं बभ्रुमेकहायनीं ज्यायसीं वेति । पृ० ६५८

कठसूत्रे — तस्य दक्षिणेषु सप्तसु पूर्वपदेषु लक्षणं कुरुते । पृ० ६५६

काठके च — न विचीयमानं प्रेक्षेरन्निति । पृ० ६६१

अपरेण ब्रह्मयजमानौ दक्षिणतः शकटमन्वारभ्याह सोमायेत्यादि काठके । पृ० ६६८

मानवलौगाक्ष्यापस्तम्बसूत्रेषु अत्र सुब्रह्मण्य सुब्रह्मण्यामाह्वयेत्येवं प्रैष उक्तोऽस्ति । पृ० ६६६

अग्रेण प्राग्वंशं कर्णगृहीतमजमग्नीषोमीयं कालालं पीवानमवस्थापयती-ति मानवादिषु । पृ० ६७०

काठके च — वरुणस्य स्कम्भसर्जन्यसीति शम्यां प्रवृहयति प्रउक्त इति योक्त्रपाशं प्रमुच्य प्रविश्य पत्नीमन्वारम्भयित्वा निर्वपति वैष्णवं नवकपाल-

मग्नेस्तनूरिति पञ्चकृत्वः सावित्रादिभिस्तुल्येनोत्तरं विमुञ्चति वरुणोऽसीति सोममादत्त इत्यादि । प्रोक्षणादि तुल्येडान्ता सन्तिष्ठत इति च । पृ० ६७३

अत्र कठसूत्रे विशेषः—गार्हपत्ये तप्तानां दीक्षितस्योदकार्थो दक्षिणाग्नौ पत्न्या इति । पृ० ६७४

काठके—सौमिकीं वेदिं विधित्सन् पञ्चदशसु प्रक्रमेषु लक्षणं कुरुते त्रिपदः प्रक्रमोऽर्धचतुर्थपदो वा पदं पञ्चदशाङ्गुलं द्वादशाङ्गुलं वा तत एकत्रिंशतौ ततस्त्रिषु ततस्त्रिषु ततो द्वादशसु पाशः पूर्वेण प्राग्वंशं त्रिषु प्रक्रमेषु शङ्कुं निहन्ति तस्मिन्पाशं प्रतिमुच्य प्राचीमायम्य यदेकविंशतौ तत्र शङ्कुं निहन्ति तस्मिन्पाशं प्रतिमुच्य पञ्चदशसु गृहीत्वा दक्षिणायम्य शङ्कुं निहन्त्येतेनोत्तरोऽन्तो व्याख्यात एवं पूर्वार्धे विदधाति त्रिषु गृहीत्वा द्वादशसु तत्र शङ्कुं निहन्तीति । पृ० ६८७

काठके—सच्छदिष्कयोर्हविर्धानयोर्ग्रन्थीन् विचृत्य प्रक्षाल्याभ्यज्याभितः पृष्ठ्यामवस्थाप्येति । पृ० ६९१

काठके च—त्रिरनूक्षेऽनूद्दृह्णन्तो वर्तयन्तीति । पृ० ६९३

कठसूत्रे—द्विपुरुषया पञ्चाङ्ग्या हविर्धानं विदध्यादनःसंमितं वैव स्याद् द्विप्रादेशया पञ्चाङ्ग्योपरवान् विदध्याद् द्विप्रादेशोपरवेषु पृष्ठ्या प्रादेशं द्वैधं सम्भुज्यार्धप्रादेशेन परिलिखेद्दशपदया पञ्चाङ्ग्योत्तरवेदिं विदध्याच्चतुः शय्या पञ्चाङ्ग्याग्नीध्रीयं विदध्यात्त्रिपदया पञ्चाङ्ग्या धिष्ण्यान् विदध्यादष्टादशशय्या पञ्चाङ्ग्या सदो विदध्यादिति । पृ० ६९६

काठके—दक्षिणस्य प्रत्यगुपस्तम्भनादिति । पृ० ६९७

काठके—बाहुमात्रान् खनन्त्यसम्भिन्दन्तोऽधस्तात् सम्भिन्दन्ति । पृ० ६९८

काठके—अध्वर्युयजमानौ संविमृशतो द्वा अन्यो द्वा अन्यः किमत्रेत्यध्वर्युर्यजमानो भद्रमिति प्रत्याह तन्नौ सहेत्युभावुपस्पृश्येति । पृ० ६९९

काठके—आधिषवणे फलके पुरस्तादंहीयसी पश्चाद्वरीयसी द्व्यङ्गुले वा संहिते पश्चाद्व्योहणा इति प्रोक्षत्युत्तरेणोपरवेषूपदधाति । उत्तरेण पुरीषेण पर्युह्य शङ्कुभिः परिणिहत्येति । पृ० ७००



काठके—पूर्वेणोपस्तम्भनं पात्रेभ्यः खरं करोतीति । पृ० ७०१

काठके—अर्धपञ्चमेषु पृष्ठ्याया दक्षिणा मध्य औदुम्बर्यै गर्तं परिलिखतीति । पृ० ७०१

काठके च—न प्रत्यक्सदोऽतीयादध्वर्युः समया यद्यतीयात्क्षेत्रस्य पत इति प्रतिसञ्चरेदिति । पृ० ७०५

काठके—प्रत्यगुदग्घविर्धानादाग्नीध्र्यां शालामर्धमन्तर्वेद्यर्धं बहिर्वेदि प्रागपरस्माद्वेद्यन्तात्सदो नवशयं प्राक्सप्तविंशतिस्तिर्यगिति । पृ० ७०६

काठके च—रौद्रेणेत्यनुषङ्गः सर्वत्रेति । पृ० ७०७

अत्र काठके विशेषः—वेदिशेषं स्तृणाति ससदोहविर्धानं धिष्ण्यखरवर्जमिति । पृ० ७०९

काठके च वत्सापाकरणस्य कालान्तरमुक्तम्—वत्सानपाकृत्य प्रवर्ग्यवति पात्राण्युद्वास्याग्निकर्मणाग्निं प्रणीयेति । पृ० ७१०

कठसूत्र एतेषां सर्वेषामग्नीषोमीयपात्रैः सहासादनं प्रोक्षणं नयनं च विहितमस्ति । पृ० ७१२

काठके—आग्नीध्रीये धिष्ण्ये प्रत्यङ् तिष्ठन्निधायाग्ने नयेति जुहोत्यत्र ग्राववायव्यानि सादयन्त्यासन्दीं चेति । पृ० ७१३

काठके—प्रत्यङ् धिष्ण्यानतिसर्पेदध्वर्युरिति । पृ० ७१४

तथा च काठके—यदि बहवः पशवः पुरोडाशा वा स्युर्जुहूपभृतोरुपस्तीर्य जुह्वामवदायाभिघार्योपभृत्यवदायाभिघार्योत्तमस्याभिघारणमनु सौविष्टकृतमभिघारयेद्यत्र क्वचन सहोपभृदेवमेव कुर्यादिति । पृ० ७२३

कठसूत्रे—मार्जयित्वा वसतीवरीर्गृह्णाति वहन्तीनां कुम्भेन प्रतीपस्तिष्ठंश्छायायां दर्भैरन्तर्धाय हविष्मतीरिति पूरयित्वान्यैरपिधाय सञ्चरेण प्रविश्यापरेण गार्हपत्यमग्नेर्व इति निधायेति । पृ० ७२७

नाग्नीषोमीये हृदयशूलं करोति न सवनीये न स्वरुमनुप्रहरति नान्तरापो देवयजनं च पथा व्यवेयात् प्रागस्तमयान्निष्क्रम्य वसतीवरीर्गृह्णाति वहन्तीनां प्रतीपस्तिष्ठन् प्रतीपं कलशमुपमारयतीति कठसूत्रेऽप्येवमेव क्रम उक्तोऽस्ति । पृ० ७२८

काठके — संस्थिते वसतीवरीः परिहरति व्युत्क्रामतेत्युक्त्वापरेण विहारं परिक्रम्य दक्षिणेन वेद्यन्तेन गत्वा दक्षिणस्यामुत्तरवेदिश्रोण्यां सादयतीन्द्राग्न्योरिति यथेतं परेत्यापरेणाग्नीध्रीयमग्निं विश्वेषां देवानामिति सादयतीति । पृ० ७२६

काठके च — ऐन्द्रं दोहयति वत्सानपाकृत्याग्नीध्रीये यजमानो वसतीति । पृ० ७३१

काठके — देवेभ्यः प्रातर्यावभ्योऽनुब्रूहि ब्रह्मन् वाचं यच्छ सुब्रह्मण्य सुब्रह्मण्यां पैतापुत्रीयामाह्वयेति प्रेष्यतीति । पृ० ७३४

काठके — दधि सक्तवः करम्भः सक्तवः परीवाप इति । पृ० ७३४

मानवकठसूत्रयोः प्रतिप्रस्थातः सवनीयान्निर्वपस्वेति प्रेषणपूर्वकं प्रतिप्रस्थातृकर्तृकत्वमुक्तमस्ति । पृ० ७३४

कठसूत्रे — दक्षिणश्रोण्यामुक्थ्यस्थालीं पूर्वमुक्थ्यपात्रमुत्तरस्यां श्रोण्यामादित्यस्थालीं पूर्वमादित्यपात्रमिति । पृ० ७३६

काठके — वायव्यानि हस्तपाणिप्रादेशमात्राणि तृतीयमात्रखातानि नानालक्षणानि वैकङ्कतं मन्थिपात्रमाश्वत्थे उभयतोमुखे ऋतुपात्रे स्रुक्पात्ररूपे तयोरश्वस्येव शफोऽधस्तादिति । पृ० ७३६

स्रुक्पात्रमात्रं पारिप्लवं चतस्रो ग्रहस्थालीरिति काठके । तस्य च विनियोग उक्तः या वां कशेति द्रोणकलशात्पारिप्लवेन गृह्णातीति । पृ० ७३७

काठके — शुक्लोर्णानां विचितकेशानामूते पवित्रे प्रादेशमात्रारत्निमात्रे इति । पृ० ७३७

कठसूत्रे — आधवनीयपूतभृतौ च कुम्भौ सोदश्वनौ सापिधानावपरमाधवनीयमिति । पृ० ७३८

काठके — नैयग्रोधाश्वमसा रौहीतका वा सर्वाणि वा पर्णमयानीति । पृ० ७३८

कठमैत्रसूत्रयोस्तु प्रतिग्रहणं द्वयोर्द्वयोरेवान्तर्धानमुक्तम् । पृ० ७४५

काठके—श्वात्रा स्थेति होतृचमसात्सोमं स्नेहयित्वा तस्य षडंशून् प्रतिप्रस्थाता सव्ये पाणावभिषजति द्वौ द्वावसंश्लिष्टौ तस्मिन्नुपांशुपात्रमादायेति । तथा — अभिषुणुयादष्टकृत्व उपांशुसवनपाणिरञ्जलिनोपांशुपात्रे सोममासिञ्चति वाचस्पतये पवस्वेति प्रवृह्यांशून् प्रतिप्रस्थातान्तर्दधाति देवौ देवानामिति प्रत्यभिषजति भूयसीरासिच्यैकादशकृत्वोऽभिषुत्यैवमासिञ्चति । एवमन्यौ प्रतिप्रस्थाता भूयसीरासिच्य द्वादशकृत्वोऽभिषुत्यैवमासिञ्चतीति । पृ० ७४५



काठके — ग्रहमादाय स्वाकृत इत्युत्थायोर्वन्तरिक्षमिति दक्षिणा परिक्रम्य दक्षिणार्धेऽग्नेर्ऋजुस्तिष्ठन् सर्वहुतामित्यादि । पृ० ७४६

काठके — ऋजीषेण ग्राव्णः प्रच्छाद्याधोऽक्षं द्रोणकलशमुद्गातारः प्रोह्यान्तराक्षविष्कम्भौ दशापवित्रं न्यस्यत्याहिते द्रोणकलशे वितते पवित्र आधवनीयाद्धोतृचमसं पूरयित्वासिञ्चति सन्ततं स्रवन्त्या ग्रहान् गृह्णातीति । पृ० ७५१

अत्र कठसूत्रे — तुल्यमुपांशुनासादनादुत्तरार्धे होम इति । पृ० ७५३

तथा च काठके — ये देवा इत्याग्रयणं द्वयोर्धारयोराग्रयणाद् द्वितीयामिति । पृ० ७५५

काठके — प्रत्यङ्मुखोऽध्वर्युः प्रस्तोत्रे दर्भान्प्रयच्छन्नाह सोमः पवत इति प्रातःसवने । तुल्यमासर्पणात्सदसि प्रस्तोत्रे दर्भान् प्रयच्छन्नाह सोमः पवत इति माध्यन्दिने । एवंविधमेव तृतीयसवनेऽपि सूत्रमस्ति । पृ० ७५८

काठके — आश्विनं गृह्णाति या वां कशेति द्रोणकलशात्पारिप्लवेनैतस्मादत ऊर्ध्वं प्रातःसवने गृह्णीयान्मरुत्वतीयमाहेन्द्रौ च माध्यन्दिन इति । पृ० ७६०

काठके — मूर्धानं दिव इति ध्रुवं ध्रुवोऽसीति सादयति तं प्रत्यङ्मुखो राजपुत्रो रक्षेदिति । पृ० ७६१

काठके — आग्नेयमजं सवनीयमुपाकरोति तुल्यमाश्रावणादाश्राव्य होतारं वृणीत एवमितरानिन्द्रं होतारं होत्रादिति होतुरभिराग्नीध्रादित्याग्नीध्रो वरुणमश्विनाध्वर्यू आध्वर्यवादित्यध्वर्योर्मित्रावरुणौ प्रशास्तारौ प्रशास्ता-

दिति प्रशास्तुरिन्द्रो ब्रह्मा ब्राह्मणादिति ब्राह्मणाच्छंसिनो मरुतः पोत्रादिति पोतुर्ग्रावो नेष्टारो नेष्ट्रादिति नेष्टुर्ग्रा नेष्ट्रादिति वा । अग्निर्ह दैवीनां विशां पुरु एतायं सुन्वन्यजमानो मनुष्याणामिति गृहपतेः । सकृदाश्राव्य होतारं वृणीते नामधेयैरितरान्मन्त्रेण गृहपतिमित्येक इति । पृ० ७६२

कठमैत्रसूत्रयोरनेन द्विवचनान्तेनैव प्रशास्तुर्वरणविधानात् । मित्रावरुणौ प्रशास्तारौ प्राशास्त्रादिति प्रशास्तुरिति काठके । पृ० ७६३

कठमैत्रसूत्रयोरित्थमेव पाठदर्शनादनेकयजमानके सुन्वन्तो यजमाना इति । पृ० ७६३

वपामार्जनान्ते कठसूत्रे सर्वेषां भोजनमुक्तम्—मार्जयित्वा भुक्त्वा प्रक्षालितपादा ग्रहानवेक्षन्त इति । पृ० ७६५

काठके च सहानुवाचनम्—पुरोडाशादीनां पयस्यान्तानामवद्यन् प्रातः प्रातःसवस्येन्द्राय पुरोडाशानामनुब्रूहीत्यवदायमानानामिति लौगाक्षिरिति । पृ० ७६६

काठके—इष्टे स्विष्टकृता प्रचरत्यग्ने पुरोडाशानामिति सम्प्रैष इति । पृ० ७६७

कठमैत्रसूत्रयोस्तु उभयत्रानुहोमो विहितः । तथा च काठके—द्विदेवत्यैश्चरतोऽर्धमैन्द्रवायवस्य प्रतिप्रस्थातादित्यपात्रे गृह्णात्युपयामगृहीतोऽसि वायव इन्द्रवायुभ्यां त्वेति वायव इन्द्रवायुभ्यामिति सम्प्रैषस्ताभ्यां चरत उत्तरः प्रतिप्रस्थातैवं सर्वत्र युगपत्प्रचरणेषूत्तर एव प्रतिप्रस्थाता द्विरिष्ट्वाध्वर्युपात्रे शेषमासिच्य तस्यार्धमादित्यपात्रेणादित्यस्थाल्यामासिञ्चतीति । पृ० ७६८

काठके—होतृचमसमुख्यानुन्नयति नाच्छावाकचमसमिति तस्योपरिष्टादुन्नयनविधानात् । पृ० ७७०

तथा च काठके—अनूद्यच्छन्ते चमसानाश्राव्याहेति । तथा—ब्रह्मोद्गातृहोतृयजमानचमसानां द्विर्यजति सकृदितरेषां द्विर्हुतान् सदो हरन्ति सकृद्धुतान् द्विर्द्विर्यजत्याश्रावं प्रशास्तर्यजेति प्रशास्तुः सम्प्रैषो ब्रह्मन्यजेति ब्राह्मणाच्छंसिनः पोतर्यजेति पोतुः नेष्टर्यजेति नेष्टुरग्नीद्यजेत्यग्नीधस्तान् सदो



हरत्ययाडग्नीदित्युक्त्वा द्विदेवत्यान् सम्भक्षयत इति । पृ० ७७१

काठके—आग्नीध्रे पुरोडाशान्भक्षयति घृताक्तान्यजमानो हविष्यं पत्नी भुङ्क्त इति । पृ० ७८१

काठके—प्रपद्यमानः प्रतिप्रस्थाता दक्षिणेनाध्वर्योः पात्रं हरेदुत्तर एव सञ्चरेदिति । पृ० ७८२

काठके विशेषः—द्वारे हविर्धानस्योपविश्याध्वर्यू यजतमित्युक्तेऽश्विनावध्वर्यू यजत आध्वर्यवादृतुना सोमं पिबतामिति होतारं वा प्रेष्येद्धोतरेतद्यजेति यद्यध्वर्युर्यजेतोन्नेता ग्रहेण चरेदिति । पृ० ७८३

कठसूत्रे—शेषं सम्भक्षयतो होत्रा पोत्रा नेष्ट्राग्नीधा ब्राह्मणाच्छंसिना मैत्रावरुणेनेतीतरथा पात्रं पर्यस्य होत्रा पोत्रा नेष्ट्राच्छावाकेनेति यथापूर्वं पात्रं कृत्वाध्वर्युणा यथालोकं यजमानेन चेति । पृ० ७८४

काठके—आह्वयते होता प्राङ्मुखमध्वर्युं सदोविल आसीनं शोंसावो दैवेति प्रदक्षिणमावृत्य प्रत्यङ् तिष्ठन् प्रह्वः प्रतिगृणातीति । पृ० ७८५

एवमेव काठकेऽपि—स्तुते प्रउगे वैश्वदेवेन प्रचरति शेषं सम्भक्षयतो यथाचमसं भक्षयन्ति प्रक्षाल्य मैत्रावरुणचमसमुख्यानुन्नयन्त्युक्थ्यपात्रेणोक्थ्यस्थाल्या गृह्णात्युपयामगृहीतोऽसि मित्रावरुणाभ्यां त्वेति पुनर्हविरिति स्थालीमालभ्य स्तोत्रमुपाकरोति शस्त्रेण ग्रहेण चमसैश्चरन्ति देवेभ्यस्त्वेति मुख्ये शेषमवनीय शेषं सम्भक्षयतो यथाचमसं भक्षयन्ति प्रक्षाल्य ब्राह्मणाच्छंसिचमसमुख्यानुन्नयन्त्युक्थ्यपात्रेणोक्थ्यस्थाल्या गृह्णातीत्यादि । पृ० ७९०

काठके—सोमातिरेकं रक्षेत्प्रशास्तः प्रसुवेत्युक्ते यथाप्रसृप्तं निःसर्पन्ति सन्तिष्ठते प्रातःसवनमिति । पृ० ७९१

काठके—ग्रावसु राजानं न्युप्योष्णीषं ग्रावस्तुतेऽध्वर्यवे वसनमिति । पृ० ७९२

काठके—आग्रयणं तिसृणां धाराणामाग्रयणादन्तर्यामाच्चेति । पृ० ७९४

काठके — सदसि प्रस्तोत्रे दर्भान्प्रयच्छन्नाह सोमः पवत इति । पृ० ७९५

कठसूत्रे — स्तीर्णे दधिघर्मेण चरति यदि प्रवर्ग्यवान् पशुपुरोडाशेनेडान्तेन चरित्वा माध्यन्दिनीयैस्तुल्येन चरति माध्यन्दिनस्य सवनस्येति सम्प्रैष इति । पृ० ७९६

आग्नीध्रे हविर्यजर्त्विज इडां प्राश्नीयुर्यजमानश्च सवनीयशेषं भक्षयति पत्नी च पत्नीशालायां हविष्यं भुङ्क्ते कठसूत्रेऽत्र हविष्यं पत्नी भुङ्क्त इति । पृ० ७९८

प्रैषानुवाचनयोरन्यतरस्मिन्नाह प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो मह स्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्य इति । अत्र प्रेष्यानुब्रूहीत्येतयोः क्रियापदयोः प्रागेव प्रियेभ्य इत्यादीनामुच्चारणं कार्यमिति कर्कः । कठमैत्रसूत्रयोरेवमेव पठितमस्ति । पृ० ८०८

पत्न्या हविष्यस्याशनं पत्नीशालायाम् । पत्नी हविष्यं भुङ्क्त इति कठसूत्रेऽत्रापि सूत्रकरणात् । पृ० ८१३

काठके च — शलाकामुष्टीन्निहितानादीप्य विहरति यथापूर्वं जुह्वामष्टगृहीतं धिष्ण्येषु जुहोति प्रत्यङ्ङासीनो विभ्वे प्रवाहणाय स्वाहेत्यादीति । पृ० ८१५

काठके — होतृचमसमुख्यान्त्सर्वे सोममुन्नयत्याग्रयणध्रुववर्जमन्यं होतृचमसे स्तोत्रमुपाकरोतीति । होतृचमसे ध्रुवस्यावकाशं कृत्वेति पृ० ८१७

पत्नी सदः प्रवेश्यापरेणोत्तरत उपविष्टामुद्गात्रा समीक्षयति प्रजापतिर्वृषासीति । एवमेव काठकेऽपि । पृ० ८१८

प्रभुज्य जानुनी प्रत्युह्य वसनान्तान् कमण्डलुनेति काठके । पृ० ८१८

काठके — एवा न इति सकृदुक्तायां होतृचमसे ध्रुवमवनयति प्रत्यङ्ङासीन इति । पृ० ८१८

काठके तु — द्विरिष्ट्वा होतर्युभेतर्युपहवमिच्छन्ते सर्वे धाना असम्भिन्दन्तो निर्धीय प्रक्षाल्याचम्योत्तरवेद्यां निवपेयुरिति । पृ० ८२१



अग्नौ शकलान्यादधातीति काठके । पृ० ८२२

कठमैत्रापस्तम्बसूत्रोक्ता अवभृथेष्टिगता विशेषा वरुणप्रघास उक्ताः । पृ० ८२६

काठके — पत्नीशाले प्रायणीयस्य निष्काषमुदयनीयमभिनिर्वपतीति । पृ० ८२७

काठके — आमिक्षा वा स्यात्तूष्णीमुपचरिताज्यभागप्रभृतीडान्ता सन्तिष्ठत इति । पृ० ८२८

काठके—शालामुखीयोत्तरवेदिकौ पृथक्समारोप्य यो वा पत्नीशाले विहारः सञ्चरेण निष्क्रम्याष्टाकपालमुदवसानीयं निर्वपतीति । पृ० ८२९

लौगाक्षिः — शुचिर्वाग्यतः शीली स्यान्नायज्ञियां वाचं ब्रूयाद्यदि ब्रूयाद्वैष्णवीमृचं यजुर्वा जपेदपि वा नमो विष्णव इत्येव ब्रूयादिति । पृ० ८३४

लौगाक्षिः — अग्नीषोमयोः सन्नयोः सञ्चरेण प्रविश्यापरेण हविर्धानं दक्षिणा परिक्रम्य दक्षिणतोऽग्नेरनन्तर उपविशत्यत्रासीता मार्जनाद्धुतायां वपायां यथेतं प्रत्येत्य चात्वाले मार्जयित्वापरेणोत्तरवेदिं दक्षिणा परिक्रम्य यथास्थानमुपविशत्येषोऽत ऊर्ध्वं सञ्चर इति । पृ० ८३६

लौगाक्षिसूत्रे विशेषः—सवनीयासु प्रपद्यमानास्वनुप्रपद्येतापरेण दक्षिणं हविर्धानं दक्षिणा परिक्रम्य दक्षिणतः सोमस्यानन्तर उदङ्मुख उपविशत्यासीता सर्पणात्सर्पणकाले मैत्रावरुणमन्वारभ्य निःसृत्येति । पृ० ८३६

कठसूत्रे — ब्रह्मन् स्तोष्याम इत्युक्ते रश्मिरसीत्यनुवाकस्तोमभागाः प्रतिमन्त्रं देव सवितरित्यनुषङ्गस्तेषामेकैकं स्तोत्रेषु द्वादशाग्निष्टोमे पञ्चदशोक्थ्ये षोडश षोडशिन्युत्तरे द्वादश रात्रिपर्यायेषु उत्तरे त्रयो राथन्तरे सन्धौ नाप्तोर्याम्ण्यूर्ध्वमाश्विनान्न वाजपेयस्यातिरिक्तस्तोत्रे यथाब्राह्मणोक्तमेवात्रानुज्ञानमिति । पृ० ८३७

सर्वस्मिन्नपि राजसूये भार्गव एव होतेति कठमैत्रसूत्रयोरस्ति । पृ० ८७५

तेषामहीनानां मध्ये आम्नानादतिरात्रान्नवसप्तदशादीन् वक्ष्यमाणांस्त्रयोदशसंख्यानहीनधर्मकानेके इच्छन्ति । अन्य एकाहधर्मकानतः कठमैत्रादिसूत्रेषु एकाहमध्य एव त्रयोदशातिरात्राः सूत्रिताः । पृ० १०१७

---

## KĀTYĀYANA SRAUTASŪTRA VYĀKHYĀ*

### CHAPTER 19.

तथा च काठके — सौमिक्या वेदितृतीये सौत्रामण्या यजेत इति श्रुतेः । परस्याच्च या रज्जुः पार्श्वः पादमात्री तिर्यक् तस्यास्त्वया रज्जुः प्रक्रमस्थानीया भवति तुल्यं सौमिक्या विधानमिति सामान्येनैवंविधस्यैव प्रक्रमस्योपदेशात् । पृ० ७

पाखिना कार्यं श्रीतं पाखिनोपमृज्य सादयतीति कठसूत्रम् । पृ० १०

तदुक्तं कठसूत्रे — श्रीतं श्येनपर्णेनोपसृज्य सादयतीति । पयोग्रहणं तु पाखिना इत्युक्तम् । पृ० १२

काठके विशेषः — सह पशूनुपाकरोत्याश्विनमजं सारस्वतीं मेषीमैन्द्रमृषभं वा वृष्णिं वेति । पृ० १३

---

* This portion of the Vyākhyā of Devayājñika is not yet published. For this I have depended on the Ms. No. 6520, Punjab University Library, Lahore.

CHAPTERS 20-21.

तथा च काठके — त्रयाणां च वपा आस्तीर्णाभिघारिताः कृत्वा प्रजापतयेऽश्वस्य तूपरस्य गोमृगस्य वपानां मेदस इति संप्रैषौ हुतासु राजते न द्रोणकलशादुत्तरं महिमानं गृह्णाति यः प्राणतत्प्रस्तस्य[1] ते पृथिवी महिमेति हुत्वा प्रतिप्रस्थाता इतरेषां वपा उपस्तीर्णाभिघारिताः कृत्वा जुह्वां पर्यस्यन्ति[2] विश्वेभ्यो देवेभ्यश्छागानां छागानां मेषाणां मेषीणामुस्तीणा[3]-मुस्त्रियाणां वपानां वपानां मेदस इति संप्रैषाविति । २०. ३३.

तथा च काठके — राजा सर्वस्वं दत्त्वा अरणी आदाय वानप्रस्थं गच्छेदिति हि विज्ञायत इति । २१. ३.

* Cf. Mss. No. 6521. and 6522., Punjab University Library, Lahore.

1 So Ms. This may be read यः प्राण-तस्तस्य ते पृथिवी. Cf. यः प्राणतो निमिषतो etc. KSA. 5. 13; VS. 23. 3; AV. 4. 2. 2; and तस्य ते पृथिवी महिमौषधयो KSA. 5. 13.

2 So Ms.

3 So Ms. May be उस्रियाणा॰



CHAPTER 22.

अन्यत्र वचनादिति । अतः छन्दोगसूत्रमानवसूत्रयो[1]र्विशेषवचनादहीनानां पौर्णमास्यामारम्भो भवति । अत एव कठमैत्रादिसूत्रेषु एकाहमध्ये एव त्रयोदशातिरात्राः सूत्रिताः । पृ॰ २

काठके — तिस्रः पराचीरुपसद उपयन्त्युपसदन्तरालेषु संमीलयन्ति प्रथमायां संस्थितायां यूपकर्मेति । पृ॰ २०

कठसूत्रे — महारात्रे वाग्यतस्याग्निहोत्रं हुत्वा योजनमात्रेभ्य ऋत्विजः समावहन्ति पुरस्तादध्वर्युं दक्षिणतो ब्रह्माणं पश्चाद्धोतारमुत्तरत उद्गातारमश्वरथैः सक्षीरद्युतिभिस्ततो यश्नवनीतमुदियान्मदाज्ये कुर्यादूढेषूद्यन्तमादित्यमुपतिष्ठते आदित्येभ्यः सद्यः सुत्यां प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सौम्येभ्यः सोमपेभ्यो ब्राह्मणाय दीक्षयनमिति षट्स्थूणायां दीक्षितशालायामग्नीन् विहृत्य रुक्मं निधाय सप्तहोत्रान् हुत्वा तुल्यमावाचो यमनाद्धाथ तस्य सनिं प्रहिणोमि प्रायणीयं वहन् निर्वपति तुल्यमोपसदस्तस्य हविष्कृता चावविसृजते धेन्वा राजानं क्रीणात्यजं हिरण्यं वाधिकं ददाति त्रिहायनेन साण्डेनेत्येके तिस्रः पराचीरुपसद उपयन्त्युपसदन्तरालेषु संमीलयन्ति प्रथमायां संस्थितायां यूपकर्म मध्यमायां संस्थितायां तुल्यैन सोऽश्वेदिकायां गवोर्वरायां वेदिं मिमाय मध्य उखे द्यां

* Cf. Ms. 6523. Punjab University Library, Lahore.

1 Ms. छन्दोगसूत्रमानवसूत्रं मानवसूत्रमानवसूत्रयोः

यूप्यं निहत्य तस्मिंस्तन्त्रीं बद्ध्वा ताननड्हो बद्ध्वा प्रदक्षिणं पर्यायणयन्ति मृच्चितेषु प्रवृह्य यूप्यं यवैलायां तमुत्तरवेद्यां कृत्वा खलेवाल्या कृतं कलापिचषालं यूपं कुर्वन्तीत्येक उत्तमायां संस्थितायामग्निप्रणयनादितुल्यामास्थरूपोहणात् स्तरणकाले प्राचो यवान् प्रश्रयति यवा बर्हिर्भवति[1] दर्भैः पृष्ठ्यां स्तृणाति स्वर्वन्तं कृत्वा कुम्भाद्वसतीवरीर्गृहीत्वा सादयित्वा श्यावश्यास्वश्या[2] तुल्यायं वसतीवरीः परिहरतीध्माबर्हिः संनह्य तुल्यमाश्विनस्य ग्रहणादाश्विनं गृहीत्वा सह पशूनुपाकरोत्यग्नीषोमीयं सवनीयं सवनीयं मैत्रावरुणीं वशामनूबन्ध्यामग्नीषोमीयस्य स्थानेऽग्नीषोमीयं पुरोडाशं निर्वपेदनूबन्ध्यायाः स्थाने मैत्रावरुण्यामिक्षया यजेत दक्षिणावेलायामश्वं शावं रुक्माबद्धं ब्रह्मणे ददात्याङ्गिरसो ब्रह्मा नीयमानायाः सयीः सामभिरुपतिष्ठते द्वादशं तु सर्वेभ्यस्तुल्यमनूबन्ध्यायाः शूलकर्मानस्तमितेऽवभृथं यन्तीति ॥ पृ० २७

कठसूत्रे — व्रात्यं चरित्वा चरिष्यन्तो व्रात्यस्तोमैरग्नीन् समोप्य शुद्ध्यर्थाः सह यजेरन्निति ॥ पृ० २७

कठसूत्रे विशेषः — चातुर्मास्यानां सोमानां ब्राह्मणोक्ताः कामा वैश्वदेवस्थाने वैश्वदेवोऽग्निष्टोमः फाल्गुन्यां पौर्णमास्यां दीक्षेत तस्यापरपक्षो दीक्षा वैश्वदेवः पशुर्न वैश्वदेवे यूपोत्तरवेदीपरिधौ पशुं नियुञ्जन्ति बार्हस्पत्यानूबन्ध्या सर्वत्राहतं वसानोऽवभृथादुदेत्य ब्रह्मचारिव्रतो भवत्यासमापनाद्वरुणप्रघासस्थाने द्विदिव आषाढ्यां पौर्णमास्यां दीक्षते तस्य द्वादशामीक्षास्तिस्र उपसदस्तस्याग्निष्टोमः प्रथममहर्मारुतः पशुः पशुरुत्थ्यो[3] द्वितीयं वारुणः पशुमैत्रावरुण्यनूबन्ध्या साकमेधस्थाने साकमेधस्त्र्यहो यथा द्विदिवस्यैवं दीक्षोपसदः कार्त्तिक्यां पौर्णमास्यां दीक्षते तस्याग्निष्टोमः प्रथममहराग्नेयः पशुरुत्थ्यो[4] द्वितीय ऐन्द्राग्नः पशुरतिरात्रस्तृतीयः प्राजापत्यः पशुरैकादशिना वा सौर्यनूबन्ध्या शुनासीरीयस्थाने शुनासीर्योऽग्निष्टोमो यथा वैश्वदेवस्यैवं दीक्षोपसदो वायव्यः पशुराश्विन्यनूबन्ध्या । चातुर्मास्यानां सोमानामाग्नावैष्णव्या वश्वानरपार्जन्येष्ट्या वैश्वदेवोऽग्निष्टोमः प्रातःसवनीयान् वैश्वदेवहवींष्यनुप्रव-

1 So Ms.
2 So Ms.
3 So Ms. ०रुक्थ्यो ?
4 So Ms.



र्तेरन् पुरस्ताद्धार्योतनस्य वाजिनमुन्नीय सदसि वाति न भक्षेण भक्षयित्वा हार्योजनमुन्नयन्ति वरुणप्रघासेषु मारुतीसप्तमानि पूर्वस्याह्नः प्रातःसवनीयाननुप्रवर्तेरन् पुरस्तात् सम्मार्गाणां करम्भपात्राणि वारुण्यैलकपालश्चोत्तरस्याह्नः प्रातःसवनीयाननुप्रवर्तेयातामवभृथे निष्कासस्यैककपालेन सहावद्यति स्विष्टकृतं वा ततः कुर्वन्ति साकमेधेष्वनीकवती पूर्वस्याह्नः स्यात् प्रातःसवनीयाननुप्रवर्तेत सान्तपनिर्माध्यन्दिनीयान् परिहृतासु वसतीवरीषु गृहमेधीयेन चरन्ति पुरस्तात्प्रातरनुवाकस्य दर्विहोमेनाक्रीडिनीं प्रातःसवनीयाननुप्रवर्तेत महाहविर्माध्यन्दिनीयांस्तृतीयस्याह्नः पुरस्तात् सौम्य[1] परीज्याया आग्नीध्रीयं मार्जालीय आपाद्य तस्मिन् पितृयज्ञेन चरन्ति केवलवेदिः पितृयज्ञो भवति पुरस्तादवभृथस्य त्रैयंबकैर्व्रजन्ति उदवसानीयेन सह आदित्यया शुनासीर्येऽग्निष्टोमे प्रातःसवनीयाच्छुनासीर्यहवींष्यनुप्रवर्तेरंश्चातुर्मास्यानां सोमानामन्त्रहं पञ्चाशतं पञ्चाशतं दक्षिणा ददाति द्वादशशतं शुनासीर्ये ॥ पृ० ५८

काठके — ऋतपेयेन स्वर्गकामः फाल्गुनिकस्य घृतस्य चतसृभिरङ्गुलिभिरुपादत्ते तावद्दीक्षासु व्रतमुपसत्स्वङ्गुल्यपचयस्तनस्थाने भक्षयति प्रचार्य भक्षांस्त्रिः सत्यमुक्त्वा सदः प्रसर्पन्ति माध्यन्दिनीयानन्वौदुम्बरं चमसमुन्नीय तस्मिन् स्वल्पं दक्षिणाकर्म कृत्वा सञ्चरेण हुत्वा तं सगोत्राय ब्रह्मणे ददाति । अंशूनां वा वाससं पूरयित्वा तेन ब्रह्मा यजेत यदि ब्रह्मा यजेत यजमानोऽस्मै द्वितीयां दक्षिणां दद्यादिति ॥ पृ० ६७

कठसूत्रेऽपि — गर्भिणीनां धेनुशतस्य वत्सानपाकरोति प्रातःसवने संपूतं सोमं त्रयस्त्रिंशता दुग्धेनेत्येवमादि मानववत् । [मानवसूत्रम् — धेनूनां[2] गर्भिणीनां गर्भिणीनां शतमाशिरे दुहन्ति ता एव दक्षिणास्तासामुपवसथे चतुस्त्रिंशतां दधि करोति प्रातःसवने उपधाय कपालानि षड्वर्ष्टिं[3] दोहयत्यर्द्धं श्रपयति संपूतं राजानं ग्रहांश्च प्रतिदुहा परिषिञ्चति शृतेन माध्यन्दिने दध्ना तृतीयसवन इति]

1 So Ms.
2 Not found in the printed Mss.
3 So Ms. षड्वर्ष्टिं ?

छन्दोगसूत्रम् — पूर्वे वयस्युच्चावचान् याजयित्वोपनीय वा तेभ्यः समावर्त्स्यन् पुनस्तोमेन यजेत[1] । उच्चा उत्कृष्टाः । अवचा अपकृष्टाः । पूर्वे वयस्युच्चावचान् याजयित्वोपनीय[2] वा तेभ्यः समावर्त्स्यन्[3] अधमाः[3] तानेवंविधान् यागोपनयनयोग्यतारहितान् याजयित्वा तेभ्यः समावर्त्स्यन्निवर्तयिष्यमाणः । काठके पुनस्तोमेनाप्रतिग्राह्यं प्रतिगृह्येति ॥ पृ० ७४

काठके च — पूर्वश्चतुष्टोमोऽन्तरुक्थ्यस्तस्मिन्नग्निष्टोमचमसानुन्नीय त्रिषु पात्रेषूक्थ्यं विगृह्य तैः सह प्रचरेदिति । पृ० ७५

काठके — इन्द्राग्न्योः कुलायैं[4]माग्नीन्त्समारोप्य राजन्यपुरोहितौ सायुज्यकामौ पूर्वः पुरोहितो नाना यजमानचमसो अन्योन्यस्मिन्नुपहवमिच्छमानौ भक्षयित्वा ऋत्विग्घुत्वैन्द्र ऋषभ उपालभ्य ऋषभाणां द्वादशशतं दक्षिणा नानोदवसानीये इति ॥ पृ० ८०

---

1 Lāṭyāyana Śrautasūtra 9. 4. 5.

2 पूर्वे वयसि उच्चावचान् याजयित्वा उपनीय वा तेभ्यः समावर्त्स्यन् निवर्तयिष्यमाणः पुनः स्तोमेन यजेत ॥ इति अग्निस्वामी.

3 So Ms. May be अवचा अधमाः

4 So Ms.

# KĀTYĀYANA ŚRAUTASUTRA VYĀKHYĀ*

## CHAPTER 25.

तदुक्तं कठसूत्रे — प्राक्कालावकृतं कर्म नावर्तयेदन्तरितं प्राक् समापनात् कुर्यादिति । पृ० ४

काठके च — मन्त्रान्तरे कर्मविपर्यासे त्वं नो अग्न इति द्वाभ्यां जुहुयादिति । पृ० ५

काठके — उन्नीतमववृष्टं मित्रो जनानिति समिधमाधाय तद्धुत्वाथान्यां दुग्ध्वा पुनर्जुहुयात् । अग्निहोत्रमुन्नीतं कीटावपन्नं हिरण्यगर्भ इति वपायामवनीयान्या दुग्ध्वा पुनर्जुहुयात् । तथा यदि सकृदुन्नीतं स्कन्देत द्विस्त्रिर्वा न तदाद्रियेत । यद्यु वै चतुर्थमुन्नीतं स्कन्देत् स्थाल्यां शेषमवनीय चतुरभ्युन्नीय होतव्यमन्यथा वाभिदोह्यमिति ॥ पृ० १०

काठके — अग्नये पथिकृतेऽष्टाकपालं पुरोडाशं यस्य पौर्णमासी वामावास्या वातिपद्यते न्यूनोदयनेन पौर्णमास्यतिपत्तौ यश्चादर्शनेनामावास्या प्रक्रान्तावेदतिपत्ति[1] विद्यादाग्नेयमेवाग्नये पथिकृते कुर्यात्तस्या याज्यानुवाक्ये वेच्छाहीति द्वे तुल्या सन्तिष्ठत उभयातिपत्तौ चतुर्होत्रा हुत्वान्वारम्भणीयाभिरिष्ट्वा पुनर्दर्शपूर्णमासा आवृतेति ॥ पृ० ६६

अत एव द्विरात्राय त्रिरात्रायाधिकाय वा ।
समस्य जुहुयाद्धोमानित्येवं पठ्यते कठैः ॥

* Cf. Ms. 5621, Punjab University Library, Lahore

1 So Ms. प्रक्रान्तौ चेदतिपत्तिं ?

कठैः पचद्वयं त्वेव पचहोमे नियम्यते ॥ पृ० ७४

तथा च काठके — व्रतोपेतोऽव्रतं चरन् व्रातपतीं कुर्यादिति पृ० ७८

काठके विशेषः — यस्याग्निमपहरेयुरग्नौ वान्यया जपेदन्यस्य वाग्निषु यजेताग्नये संवर्गायाष्टाकपालमिति । पृ० ८६

लौगाक्षिसूत्रे — अग्न्यगारेषु दग्धेष्वन्येषु चाग्नये क्षामायाष्टाकपालन्निर्वपेदिति ॥ पृ० ९२

काठके — सान्नाय्येऽपाकृतासु धीतासु वायव्यां यवागूं श्व आमावास्येन यजेतोभयीषु धीतासु शुद्धेष्वामावास्येन यजेतार्त्तिगते[1] सायं दोह इन्द्राय व्रीहीन्निरुप्योपवसेच्छ्व ऐन्द्रः पुरोडाशस्तस्य पयसा समवदाय प्रचरेच्छ्व आमावास्येन यजेतार्तिं गते प्रातर्दोह ऐन्द्रं पुरोडाशं तस्य दध्ना समवदाय प्रचरे आमावास्येन यजेतोभयोरार्तिं गतयोरोदनं पञ्चशरावं निवपदाग्र[2] देवतानां प्रथमं यजेदथैन्द्रं श्व आमावास्येन यजेत सान्नाय्यं कीटावपन्नं मही द्यौरिति मध्यमपर्णेनान्तः परिनिनयेदाज्येन वा संस्थापयेदसंस्कृते च सान्नाय्येनेत्येव इति ॥ एवमेवापस्तम्बसूत्रेऽपि विद्यते ॥ पृ० ११३

शवाग्नयो वा एते ये पत्न्यां मृतायां धार्येतै[3] इति कठश्रुतेः ॥ पृ० १४२

तत्कठसूत्रादिष्वप्यस्य वैश्वानरस्यैतेष्वेव निमित्तेषु
द्वादशकपालस्य दर्शनान्निर्मूलमिति नादरणीयम् ॥ १७२

कर्कमते शाखान्तरसूत्रेषु च मेषमेष्योरपि पयस्यावद्यागासाधनः[4] ॥ १८०

काठके — यूपविरूढाः सत्त्रिणस्त्वाष्ट्रमालभेरन् प्राक् स्विष्टकृतो श्वग्न इति द्वाभ्यां जुहुयादुत्तरया यूपमूलं परितापयेदुत्तरया यूपविरूढानि जुहुयादिति ॥ पृ० २०७

तथा च लौगाक्षिः — सदस्यभ्युपाकृते चमसेऽतिरिक्ते हिरण्यगर्भ इति द्वाभ्यां जुहुयादिति ॥ पृ० २०८

काठके — हुताहुतौ सोमौ पीतापीतौ वा संगच्छेयातां यज्ञस्य हि स्थ इति द्वाभ्यां बहिष्परिध्यङ्गारान् दक्षिणापो ह्यहुतस्य चेति जुहुयादिति ॥ पृ० २०९

1 So Ms. आर्त्ति गते ?

2 So Ms. अग्नि ?

3 So Ms. धार्यन्त ?

4 So Ms. यागसाधनत्वात् ?



कठसूत्रे—हविर्दुष्टमपोऽवनयेत् सोमं दुष्टं मनसा प्रजापतये स्वाहेत्यभक्षणीयानुपरवेष्ववनयेदिति दुष्टस्य च पुनरुन्नयनं कार्यम्। अत्र होमोऽधिषवणफलके उह्य कर्तव्यः । काठके दर्शनात् । पृ० २१०

काठके च—नाराशंसे सर्वस्कन्ने यमनुभक्षयन्ति तं महति पात्रे गृहीत्वा प्रचर्य[1] भक्षयित्वाप्याययेदुच्छिष्टाच्चेज्जुगुप्सीता[2]पामासेकमासिच्य भक्षयित्वाप्याययेद्यदि बहवो नाराशंसाः सर्वत्र स्कन्नाः स्युरेवमेव कुर्यादिति ॥ पृ० २११

अत्र काठके विशेषः—द्रोणकलश उपदस्त आग्रयणाल्लेपमाहृत्य हिरण्यमन्तर्द्धायासिच्य पूतभृतो हिरण्यमन्तर्द्धाय ग्रहानुन्नयेदिति ॥ पृ० २१२

तथा काठके—ग्रहानुपदस्तानाग्रयणाद् गृह्णीयाद् ग्रहेभ्यो वाग्रयणं सर्वस्कन्ने नष्टे दुष्टे वा पुनः संस्करणमनादेश इति ॥ पृ० २१२

तथा च—सर्वस्कन्ने नष्टे दुष्टे वा[3] यथापूर्वं पुनः संस्करण[4]मनादेश इति सर्वग्रहचमसादिसाधारण्येनोक्तं कठसूत्रे । पृ० २१३

काठके—ग्रावणि[5] शीर्णेऽन्यं प्रयुज्योद्गातॄन्[6] ब्रूयाद्युतानस्य मारुतस्य[7] साम्ना स्तुध्वमिति ॥ पृ० २१५

अत्र काठके विशेषः—सोमे दग्धे सोमाङ्गे वा यथापूर्वं पुनः संस्करणं सौम्ये[8]ऽहनि सोमे दग्धे कृतान्तान् ज्ञात्वा ग्रहानध्वर्युः स्याशये[9] स्तोत्राण्युद्गाता शस्त्राणि होता यथापूर्वं यज्ञेन चरेयुः[10] पञ्च वरान् दद्यात्तेषु दक्षिणाकर्म क्रियेतावभृथं गत्वा पुनरुदेत्य पुरा द्वादश्याः पुनर्दीक्षेत यदि द्वादशी[11]मतिनयेदन्तर्द्धीयेत प्रायश्चित्तकर्मेत्याचार्या उत्तरस्मिन् पक्षे यजेतेति लौगाक्षिस्तत्र ता दक्षि-

1 MS. प्रवर्य, but cp. Mantra Bhāṣya of Somānanda Sūnu ( a manuscript work mentioned in Catalogue of Jammu Sanskrit MSS. p. 253; MS. No. 326. 2675 Kha ) which reads प्रचर्य. ( p. 108 ).

2 So MS.; but cp. Mantra Bhāṣya which reads जुगुप्सितायामा– ( p. 108 ).

3 So MS; but cp. Mantra Bhāṣya (p. 109) सर्वस्कन्नेन पुष्टे दुष्टे वा

4 So MS., but cp. op. cit. (p. 109) पुनः संस्कारमनादेश.

5 So MS; but cp. op. cit. (p. 160) ग्राव्णि.

6 So MS; cp. Mantra Bhāṣya (p. 160) –गातॄ ब्रूयाद्युता–

7 So MS; Mantra-Bhāṣya (160) मारुतस्य मह्य साम्ना

8 Mantra Bhāṣya (p. 122) सौत्ये

9 So MS. and Mantra-Bhāṣya

10 Mantra-Bhāṣya च देयु:

11 Mantra-Bhāṣya दशीमति न देयं तद्धीयेद–

णा दद्याद्याः पूर्वस्मिन् दास्यन् भवति नीतासु[1] चेद्वरानेव दद्यात् । प्राक्सौत्यां[2] सोमे पञ्च वरान्दद्यात्तत्र पुनर्यज्ञेऽहर्गणो सोमे दग्धे पञ्च वरान् दद्यादेकस्माद् द्वे संपश्येदन्तरेणाहवनीय[3]सोमे दग्धे पञ्च वरान् दद्यान्नात्रैकस्माद् द्वे संपश्येदिति[4] ॥ पृ० २४२

---

1 Mantra-Bhāṣya नीतसु चरानेव

2 Mantra-Bhāṣya सोत्या

3 Mantra-Bhāṣya –ये सोमे

4 Mantra-Bhāṣya स पश्यति

P. 32, l. 11 (note) : correct नित्रपदाग्नदेव– into निर्वपेदग्नि देवतानां प्र– according to Mantra-Bhāṣya p. 63

P. 32, l. 11 : correct प्रवरे आमा into प्रवरेच्छ्रू आमा according to Mantra-Bhāṣya p. 63

P. 32, l. 12 : यजेदथैन्द्रं श्व is read in Mantra-Bhāṣy as यजेदप्यथेन्द्रं श्व

P. 32, l 13 : MS. पर्णेनान्तः परिनि–; Mantra-Bhāṣya has पर्णेनान्तः परिधिनिन–

P 32, l. 13 : नेत्यव: Mantra-Bhāṣya –नेत्येक–

P. 32, l. 24 MS. हि स्व; Mantra Bhāṣya हि ड p. 107.

P. 32, l. 25 : MS. बहिष्परिध्यङ्गारान्······इति Mantra Bhāṣya बहिष्परिध्यंङ्गारे शेषं निनयेदिति p. 107.

## KĀTYĀYANA-ŚRAUTA-SŪTRA-VYĀKHYĀ[1]

### CHAPTER 26.

॥ अग्निहोत्रावृता हुत्वा वाजिनवद् भक्षयन्ति मधु हुतमिति ॥

तदुपयन्यामानीतं घर्ममग्निहोत्रावृता अग्निहोत्रहोमवत् मंत्रसहितया तदितिकर्तव्यतया हुत्वा वाजिनवत् सोपहवं भक्षयन्ति मधु हुतमिति मंत्रेण । अत्र च होममात्रमग्निहोत्रवत् कार्यम् । न तु संचराचमनादिका सर्वेतिकर्तव्यता । यदि तदभिमतमभविष्यत्तदाग्निहोत्रं हुत्वेत्येवमेवावक्ष्यत् आधानकौण्डपायिनामयनवत् । अत्र त्वग्निहोत्रावृतोपयमनीस्थं द्रव्यं हुत्वेत्येतावदेवोक्तम् । अतस्तस्य द्रव्यस्य समिदाधानपूर्वक आहुतिद्वयहोमः कर्तव्यः । न प्राचीनोदीचीना अन्यान्यङ्गानि । तथा चाहापस्तम्बः । [2]अपीपरो माह्नोरात्रै मा पाह्यजीरिति सायं समिधमादधाति । अपीपरो मा रात्र्या अह्नो मा पाहीति प्रातरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायमग्निहोत्रं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः संसृष्टहोमं वा इति । एवमेव कठसूत्रेपि ॥
पृ० २०

एवं प्रतिप्रस्थाताजां मयूषे तूष्णीमेवमेव प्रतिप्रस्थाता तूष्णीमजां दोग्धि । इयांस्तु विशेषः । मयूषे कीलके अजां बध्नाति । तत्र तूष्णीं पाशप्रतिमोकः । मयूखे बन्धनं वर्करोत्सर्गः । संदानं वर्करोन्नयनम् । पिन्वने दोहनम् । विप्रुषां विलोकनं स्तनालंभनमिति । केचिदनुपयोगाद्वर्करं संदानं च नेच्छन्ति तद-

1 Cp. MS. No 6525, Panjab University Library, Lahore.

2 Cp. TA. 4. 10. 4; 5. 8. 10; ApŚ. 15. 12. 7; MSS. 4. 3. 33; 46.

युक्तम् । आपस्तम्बकठसूत्रादिषु वर्करस्य साक्षात्पाठात् ॥ एवंशब्देन कात्यायनेनापि संगृहीतत्वात् ॥ पृ० २१

कठसूत्रे विशेषः—

श्वश्वरिष्यन्प्रवर्ग्येण पूर्वेद्युर्वत्सवर्करौ ।
अपाकुर्यात्तथा प्रातः सायं वोत्सृज्य धेनुके ॥
नाशे घर्मदुहो धेन्वा व्रतधेनुं दुहेत्ततः ।
घर्मायार्द्धव्रता दुह्याद् द्वौ द्वौ स्तनाविह ? ॥
घर्मव्रतदुहोर्नाशे आज्येन प्रचरेद् द्विजः ।
अजानाशे तु गव्येनान्यां वा धेनुमानयेत् ॥
सर्वनाशे वृतादुग्धं पयो वा दधि वानयेत् ॥ पृ० २१

अश्विना घर्ममिति ब्रह्मानुमन्त्रयते । ततो ब्रह्मा अश्विना घर्ममिति मन्त्रेण घर्ममभिमन्त्रयते । अथ ब्रह्मानुमन्त्रयते ब्रह्मा वा ऋत्विजां वा भिषक्तम इति श्रवणात् । ऋतं द्रव्यमिति कर्कः । पात्रस्थमित्यन्ये । उभयमथैतत्समूलम् । शाखान्तरात् । विश्वा आशा इति ब्रह्मा ऋतमनुमन्त्रयत इति काठके ।

पृ० २३

तथाहापस्तंबः—उपर्याहवनीयेघ्मर्यमाणं (?) प्रतिप्रस्थाता श्रृतदध्ना पूरयतीषे पिपीह्यूर्जे पिपीहीति विचरन्तमभिमन्त्रयत इति । काठकेऽपि इषे पिन्वस्वेत्यौष्ठीभ्यां महावीरमथाप्येति ॥ पृ० २४

---

# APPENDIX

## REFERENCES TO KAṬHAKA-GṚHYA.

## I. REFERENCES TO KATHA IN MANTRA-BHASYA[1]

(a) तत्र या सहैव कृताधाना पत्नी सा ज्येष्ठायां जीवत्यामपि सर्वाग्निभिर्दाह्या शवाग्नयो वा एते ये मृतायां पत्न्यां धार्यन्त इति कठश्रुतेः ॥

पृ० ८५

(b) ध्रुवावनयविस्मरणे कठसूत्रे प्रायश्चित्तम् । ध्रुवं ते प्राप्तकाले नावनयेत् पुनर्यज्ञायज्ञीयमुपाकुर्यादिति उद्गाता चेन्निकामयेत होतारं ब्रूयाच्छंसैव स्तोत्रीयां परिधानीयां चेति तत्र तत्रैवमवनयेत बहूनि चेत्स्तुतशस्त्राणि समतीतानि स्युरेवमेव कुर्यादिति ॥ पृ० १०९

W. Caland, Altindischer Ahnencult pp. 212-214.

अमावास्यायां पिण्डपितृयज्ञः प्राग् अग्न्यन्वाधानाद् उत्पूयापोऽन्वाहार्यपचनेऽधिश्रयति प्रक्षाल्य तण्डुलान्पवित्रान्तर्हितान् आवपति प्रक्षाल्य मूलतो मेक्षणमवदधाति । शृतमभिघार्य दक्षिणत उद्वास्य दक्षिणतः कर्षूं खात्वा तस्य दक्षिणतः स्वरम् । तस्मिन्दक्षिणाग्नेरग्निं प्रणीय कर्ष्वामुदकं निनीय सकृदाच्छिन्नान् दक्षिणाग्रान्दर्भानास्तीर्य मेक्षणेन स्थालीपाकस्य जुहोति । सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम इत्युद्धृत्य पिण्डान् निदधाति । पित्रे पितामहाय प्रपितामहायैतत्तेऽसौ च ये च त्वान्विति पितृनामानि गृह्णन्न नाम गृह्णीयादिति पौत्रो बन्धुज्ञाने यथा ब्राह्मणोक्तमत्र पितरो मादयध्वमित्युक्त्वानुप्रहृत्य मेक्षणमुदङ्ङासीतोदूष्मस्वावृत्य निह्नुते नमो

1 MS. No. 326, 2675 Kha mentioned in Catalogue of Jummu Sanskrit MSS. p. 253.

वः पितरो जीवन्तो भूयास्मेति पिण्डशेषमुद्धृत्यावजिघ्या ते अग्न इति दक्षिणाग्निं गत्वा तस्मिन्त्समिधमाधायावृत्य जपति मनो न्वाहवामह इति तिस्रो यदन्तरिक्षमिति गार्हपत्यमवघ्रातं मध्यमं च पिण्डं पत्नीं पुत्रकामां च प्राशयेद् अरूरुचदुषस इति ।

अरूरुचदुषसः पृश्निरग्रिय,
उक्षा बिभर्ति भुवनानि वाजयुः ।
मायाविनो ममिरे अस्य मायया
नृचक्षसः पितरो गर्भमादधुः ॥
आ दत्त गर्भं कुमारं पुष्करस्रजम् ।
यथायं पुरुषोऽसद् ॥

इति मावैव शेषमवेक्षेतैवमनाहिताग्नेर्गेहाग्नौ पितापुत्रौ चेदाहिताग्नी स्यातां येभ्यः पिता तेभ्यः पुत्रो दद्यात् । पिता प्रेतः स्यात् पितामहो जीवेत् पित्रे पिण्डं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् द्वाभ्यां दद्यात् ॥

II. In Trikaṇḍa-Maṇḍana[1]

OR

I. Apastamba-Sūtra-Dhvanitārtha-kārika

(a) तपोऽग्निहोत्रं यज्ञं वा सर्वं कुर्यात्कठाशयात् ॥ I पृ० ७२
(b) कुशाभावे कठाः प्राहुः पर्वपल्लवदोषघीः ।
वरूकरत्तारकठक् परिध्यायकवर्जिताः ॥ II पृ० ८०
(c) पालाशः खादिरो बैल्वो यूपो रौहितकोऽपि वा ।
औदुम्बरो वा यूपः स्यादित्याहुः कठशाखिनः ॥ पृ० ८५
(d) अग्निहोत्रहवन्यत्र कार्या वैकङ्कती शुभा ।
पालाशी तु कठश्रुत्या तदभावेऽन्यवृक्षजा ॥ पृ० ८७
(e) आपस्तम्बोक्तवृक्षोक्ता भवेयुः क्रतुषु स्रुचः ।
शमीमय्योऽथवा भूर्जवृक्षमय्यः कठश्रुतेः ॥ पृ० ८८

1 Cp. Calcutta edition 1903 by Candra Kānta Tarkālaṅkāra.



(f) यद्वोभौ वारणौ कार्यौ तदभावेऽन्यवृक्षजौ ।
रौहीतकान् न्यग्रोधोत्थान् पालाशान् वा कठश्रुतेः ॥ पृ० ९०
(g) सर्वप्रतिनिधौ कार्यमनाज्ञातजपादिकम् ।
यद्वा प्रतिनिधानेनैवार्थसिद्धिः कठाशयात् ॥ पृ० १०८
(h) छिन्नं लूनं च पिष्टं च सान्वाय्यं मृन्मयं तथा ।
लोकसिद्धं गृहीतं चेन्मन्त्रा जप्याः कठाशयात् ॥
(i) अत एव द्विरात्राय त्रिरात्रायाधिकाय वा ।
समस्य जुहुयाद्धोमानित्येवं पठ्यते कठैः ॥ पृ० १७८
(j) प्रवासिनोऽग्निहोत्रस्य पश्चाहं सप्त वा पुनः ।
सायं प्रातः पृथग्घोमा एकस्मिन्नहनीति च ॥
कठैः पञ्चद्वयं त्वेव पञ्चहोमो नियम्यते ।
आपच्चेदनुवर्तेत दीर्घकालं कदाचन ॥ पृ० १८६
(k) सर्वद्विरात्रहोमादावभ्यूह्यमिदमीदृशम् ।
कठा अप्येवमेवार्थमङ्गीकुर्वन्ति केचन ॥ पृ० २०२
(l) काले काले पुनर्होमान् जुहुयात्प्राग्घुतानपि ।
कठेष्वेवं विदुः केचिन्नेच्छन्त्यन्ये पुनर्हुतिम् ॥ पृ० २०४
(m) अग्निहोत्रं हुतं स्वामी प्रेषितो मन्यते यदा ।
अपोऽश्नीयादिति कठैर्होमः स्पष्टमनूदितः ॥
Prakīrṇa-Kāṇḍa. पृ० २२

III. In Trikāṇḍamaṇḍanaṭīka

काठके च—वृद्धयै पुनराधेयमिति III. 12 पृ० १५९

IV. In Catur-varga-cintāmaṇi :—

कठसूत्रे तृप्तानाचमयित्वा यन्मे राम इति प्रदक्षिणं कृत्वा प्रत्येत्याभिरमन्तु भवन्त इत्युक्त्वा देवाश्च पितरश्चेत्यनुवाकशेषेणोपतिष्ठते ॥ पृ० १५०

V. In Saṃskāra-ratnamālā :—

अकाले चेत्कृतं कर्म भवेद्यत्तस्य नैव तु ।
क्रमार्थं पुनरावृत्तिरित्युक्तं कठसूत्रके ॥ Vol I. पृ० १००

VI. In Devapala :—

एवं संमार्जनानन्तरं भूतमृतं च सत्यं चेत्येतद्‌ध्यानयुक्त आवर्तयेद् ध्यानयुक्त इति काठकश्रुतेः अघमर्षणसूक्तजपः कर्तव्यः। Vol I. पृ० ४८

तथा च तत्रत्यं सूत्रम्—पाणी प्रक्षाल्य दक्षिणतोऽग्नेस्तिष्ठन् ब्रूयादग्ने व्रतपते वायो व्रतपते सूर्य व्रतपते इति ॥ Vol II. पृ० ३९

VII. In Lp-Ṛcaka[1]

ओं अथ पर्वतन्त्रप्रधाननिर्णयः।

तथा च काठके। परिशिष्टे लौगाक्षिः—

स्थालीपाकमथेन्द्राग्नी संनिकर्षे यजेद् बुधः।
ततश्चतुर्गृहीतेन विष्णुश्चैव बुभूषितः॥

इत्यमावस्याम्।

अग्निषोमावुभौ स्थालीं पौर्णमास्यां तथव च।
तेजोऽसीति तथान्यं च युवा स्थालीं यजेत्।

इति पौर्णमास्याम्। ऋग्वेदवादिनः चैषां वैश्वदेवी विशिष्यते। न हि सर्वत्र यज्ञेषु।

तथा च काठकेयिनाम्—तथा च पर्वतन्त्रदेवताः।

त्रिभिस्त्रिभिर्देवताः स्युः प्रोक्तास्तु पर्वतन्त्रके।
एकैकमाज्यभोक्तारं द्वौ द्वौ स्थाली प्रकीर्तिताः॥

अथ साग्निकमृताहविषवाक्यानि :—

भर्तुः पश्चान्मृता नारी दग्धव्या लौकिकाग्निना।
यमाय चाग्निष्वात्तेभ्यो न निर्वापश्च जातुचित्॥
शुक्ले मृतेन या गोत्रं प्राप्तुं चेत्पर्व चोत्तमम्।
यागं समाप्य विद्वांश्च प्रातर्होमं पुनर्यजेत्॥
कृष्णपक्षे विपत्तौ तु दार्शं संपादयेत्पुनः।
पार्वणे चाग्निहोत्रे च समाप्यान्त्यं समापयेत्॥

इत्यग्निहोत्रविवेकः।

1 Lp. p. 150.



VIII In Ācāra-Ratna:—

तथा चाचारचन्द्रोदये काठकगृह्ये :—

अथ चेत्प्रमादान्न शिखा स्यात्तदा कौशीं शिखां ब्रह्मग्रन्थियुतां दक्षिणकर्णे निदध्यादिति। पृ० ३

तत्रैव लौगाक्षिः—सायमेवाग्निमिन्धीतेत्येके इति। पृ० ५३

IX In Nirṇaya-sindhu :

तदुक्तं काठकगृह्ये—

यस्मिन्मासे न संक्रान्तिः संक्रान्तिद्वयमेव वा।
मलमासः स विज्ञेयो मासः स्यात्तु त्रयोदशः॥ पृ० ५१

काठकगृह्येपि :—

मलेऽनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियाम् इति। पृ० ६०
सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे।
षष्टीष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि॥
महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत्।
स्पष्टमासविशेषाख्याविहितं वर्जयेन्मले॥

इति काठकगृह्यात्॥

षष्टीष्टिः काठकप्रसिद्धा पुत्रेष्टिः।

कृष्णंभट्टव्याख्या पृ० ६१, ७५२

रविसंक्रमहीनो यो वर्ज्यावर्ज्यविधिः स्मृतः।
स एव तु द्विसंक्रान्ते मलमासेऽप्युदीरितः॥

इति काठकगृह्योक्तेः पृ० ७६

मघात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम्।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचे॥

इति काठकगृह्योक्तेः पृ० ५६६

पूर्वाह्णे वाथ मध्याह्ने यदि पर्व समाप्यते ।
उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते ॥

इति लौगाक्षिवचनात् पृ० २४६

अपराह्णेऽथवा रात्रौ यदि पर्व समाप्यते ।
उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते ॥

इति लौगाक्षिणोक्तेः पृ० २४७

अत्र लौगाक्षिः—

तिथेः परस्ताद् घटिकास्तु याः स्युः
न्यूनास्तथैवाभ्यधिकास्तु तासाम् ।
अर्धं वियोज्यं च तथा प्रयोज्यं
ह्रासे च वृद्धौ प्रथमे दिने तत् ॥

पृ० २५५

सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि ।
स्त्रीभिः शूद्रैः कुहूः कार्या तथा चानग्निकैर्द्विजैः ॥

इति लौगाक्षिवचनाच्च पृ० २६९

संपूर्णे दर्शे च विशेषमाह लौगाक्षिः—

पक्षान्तं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।
पिण्डयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः ॥

पृ० २७७, १५६०

मदनरत्ने लौगाक्षिः—षष्ठेऽन्नप्राशनं जातेषु दन्तेषु वा इति ।

पृ० ९१३

अपरार्के मदनरत्ने च लौगाक्षिः—दक्षिणतः कमुजा ( कपूजा cp. LGS. P. 355 ) वसिष्ठानामुभयतोऽत्रिकश्यपानां मुण्डा भृगवः पञ्चचूडा आङ्गिरसो वाजिमेके मङ्गलार्थं शिखिनोऽन्ये यथाकुलधर्मं वा इति ॥

पृ० ९२२



सायमेवाग्निमिन्धीतेत्येके इति लौगाक्षिणोक्तेः पृ० ९६०

तत्रैव लौगाक्षिः—

हस्तद्वयमितं कार्यं वैश्वदेविकमण्डलम् ।
दक्षिणे च चतुर्हस्तं पितॄणामङ्घ्रिशोधने ॥ पृ० १५२७

हेमाद्रौ लौगाक्षिः—

महालये गयायां च प्रेतश्राद्धे दशाह्निके ।
पिण्डशब्दप्रयोगः स्यादन्नमन्यत्र कीर्तयेत् ॥ पृ० १६०८

काठकगृह्ये—यत्र प्राणोत्क्रमस्तत्रान्वहं बलिं कुर्यात् इति ।

पृ० २००३

X In Raṇavīra-vrata-ratnākara :—

कुर्यान्नित्यां नैमित्तिकीं क्रियाम् इति काठकगृह्ये पौषविधानात् ।

पृ० १३

काठकगृह्येऽपि—मधात्रयोदशीश्राद्धं प्रत्युपस्थितिहेतुकम् ।
अनन्यगतिकत्वेन कर्तव्यं स्यान्मलिम्लुचः ॥ इति

पृ० २०

स एव तु द्विसंक्रान्तौ मलमासेऽप्युदीरितः ॥ इति काठकगृह्यवचनात् ।

पृ० २२

XI In Harihara on Pāraskara-Gṛhyasūtra 1. 2. ( P. 22 )

कठश्रुतिपक्षे तु न पक्षद्वयमेव पक्षहोमनियमः अपि तु आपदनुवृत्तौ यावदापन्निवृत्तिस्तावत्प्रतिपक्षमुक्तप्रकारेण निरन्तरं पक्षहोमान् समस्येदित्येकः प्रकारः, प्रकारान्तरं तु सायंकाले समिदाधानपर्युक्षणानन्तरमाहुतिपरिमाणं होमद्रव्यम् अग्नये स्वाहेति हुत्वा पुनस्तथैव सूर्याय स्वाहेति हुत्वा आहुतिद्वयपर्याप्तं होमद्रव्यमादाय प्रजापतये स्वाहेति सकृज्जुहुयादिति सायंप्रातस्तनयोर्होमयोः समासं यावदापदमाचरेत् । यदा तु आपदो गुरुत्वं भवति तदा सायंहोमैरेव अनेन विधानेन प्रातर्होमानां समासं कुर्यात् । एवं पक्षहोम-

समासे कृते यद्यन्तराले आपन्निवृत्तिस्तदा प्रत्यहं सायंप्रातर्होमान् हुतानपि जुहुयान्नवेति कठा आमनन्ति ।

XII In Smārtollāsa ( Part I टीका P. 41 ) काठके :—

अरत्निमात्री स्रुगग्निहोत्रहवणी पालाशी सामान्येन निर्वपणमितरासां बाहुमात्राः स्रुग्दण्डाः प्रहस्तमात्राणि प्रस्रवणान्यर्थपरिमाणानि पात्राणि पालाशी जुहूराश्वत्थ्युपभृद्वैकङ्कती ध्रुवा शमीभूर्जमय्यो वा त्वक्तो विला हंसमुख्यो भवन्तीति श्रुतिर्नैयग्रोधाश्चमसा रौहीतका वा सर्वाणि वा पर्णमयानि स्फ्यस्रुवशम्यं खादिरं प्राशित्रहरणं च यद्वा यज्ञियानां पात्रीडाचमसं लोकाच्छेषस्य प्रतिपत्तिरिति ।

Part II P. 139

भृगुः—मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम् ।
नोद्धरेच्च ततः प्राज्ञो य इच्छेच्छ्रेय आत्मनः ॥
सकृदुत्तारणात्तस्य प्रायश्चित्ती भवेद् द्विजः ।
तैत्तिरीयाः कठाः काण्वाश्चरका वाजसनेयिनः ॥

XIII In Saṃskāra-Gaṇapati. (P. 668)

तैत्तिरीयाः कठा काण्वाश्चरका वाजसनेयिनः ।
कण्ठादुत्तार्य सूत्रं तु कुर्युर्वै चालनं द्विजाः ॥

XIV In Parama-Saṃhitā-introduction[1] :—

यजुषि कठशाखायाम्—
धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥
पृ० ३३

यजुषि काठके—चरणं पवित्रमित्यारभ्य सुधितां दधात्वित्यन्तम् ॥
पृ० ३३

1. Introduction (p. 33) by S. K. Eiyangar. Baroda, Oriental Institute.

THE END